विश्वकृ ४८द्विश्वरूपश्च ४९ विश्वव्यापी ५० विधु ५१र्विधिः ५२ ।
विश्वशीर्षो ५३ नमद्विश्वो ५४ विश्वाधारश्च ५५ विश्वसूः ५६ ॥९॥
विश्वम्भर[ः] ५७ शिवो ५८ विश्वावतारो ५९ विश्वदर्पणः ६० ।
विश्वख्यातो ६१ जयो ६२ मृत्युञ्जयो ६३ मृत्युनिवारणः ६४ ॥१०॥
सर्वादिः ६५ सर्वगः ६६ सर्वजनीनः ६७ सर्वदर्शनः ६८ ।
सुश्रुतः ६९ सुस्थितः ७० सुस्थः ७१ पुराणः ७२ प्राक्तनो ७३ विभुः ७४ ॥११॥
विधिशेषो ७५ विधेः सारः ७६ परो विधि-निषेधतः ७७ ।
प्रशान्तवाह्य ७८निर्वाच्यो ७९दिसभागपरिक्षयी (?) ८० ॥१२॥
अपदो ८१ऽनक्षरो ८२ऽनिच्छो ८३ व्यतद्व्यावृत्तिलक्षणः ८४ ।
ब्रह्मचर्यफलीभूतो ८५ ब्रह्मो ८६ ब्रह्मपदस्थितः ८७ ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मवान् ८८ वेदवान् ८९ विष्णु९०र्ब्रह्मवान् ९१ ब्रह्मसम्भवः ९२ ।
सूक्ष्मः ९३ परात्परो ९४ जेता ९५ जयी ९६ सर्वमलोज्झितः ९७ ॥१४॥
उपासनानां फलदः ९८ उपास्यत्वेन देशितः ९९ ।
सर्वाविप्रतिपन्नश्च १०० कृषोष्टकुशलानि नः ॥१५॥

॥ इति महोपाध्यायश्रीयशोविजयगणिसुमुच्चिते राजनगरवास्तव्यसङ्घमुख्यसाह'पनजी'सुश्रूषिते सिद्धनामकोशे प्रथमशतकप्रकाशः ॥१॥

धर्मवि१द्धर्मकृ२द्धर्मी ३ धर्मात्मा ४ धर्मदेशकः ५ ।
सुधर्मा ६ धर्मदो ७ धर्मनायको ८ धर्मसारथिः ९ ॥१॥
दशधर्मा१०ऽनन्तधर्मा ११ धर्मधारः १२ स्वधर्मगः १३ ।
परधर्मविनिर्मुक्तो १४ धर्मप्रापी १५ विधर्मभृत् १६ ॥२॥
धर्मचक्री १७ महाधर्मा १८ धर्ममूर्तिः १९ सुधर्मदृग् २० ।
धर्माङ्गो २१ धर्मसन्यासी २२ धर्माधर्मविवर्जितः २३ ॥३॥
धर्मोत्तरो २४ धर्मकीर्ति२५र्धर्ममुद् २६ धर्ममण्डलः २७ ।
धर्मानोघा २८ धर्ममौलि२९र्धर्माग्रो ३० धर्मशासनः ३१ ॥४॥
धर्मक्षमी ३२ धर्ममृदु३३र्धर्मजु३४र्धर्मसंयमः ३५ ।
धर्मसत्यो ३६ धर्मतपा ३७ धर्मब्रह्मा ३८ शुचिस्तत[ः] ३९ ॥५॥
धर्मत्यागी ४० धर्ममुक्ति४१र्धर्मस्थो ४२ धर्मशाश्वतः ४३ ।
धर्मलभ्यो ४४ धर्मसेव्यो ४५ धर्मश्रद्धावशंवदः ४६ ॥६॥
धर्मधातुः ४७ क्षमाधातुः ४८ शुद्धधातु४९रधातुभाग् ५० ।
श्रोपातश्च ५१ निपातश्च ५२ ह्रीपातः ५३ पातकक्षयी ५४ ॥७॥
श्रेष्ठः ५५ स्थविष्ठः ५६ स्थविरो ५७ ज्येष्ठः ५८ प्रष्ठः ५९ पुरोहितः ६० ।
गरिष्ठधी६१ररिष्टच्छिद् ६२ बहिष्ठो ६३ निष्ठ एव च ६४ ॥८॥
व्योममूर्ति६५रमूर्तिश्चा६६न्तरिक्षात्मा६७ नभोमयः ६८ ।
गगनात्मा ६९ महाकाश७०श्चाम्बरात्मा ७१ निरम्बरः ७२ ॥९॥
सुयज्वा ७३ यज्ञपुरुषो ७४ यज्ञाङ्ग७५ममृतं ७६ हविः ७७ ।
धर्मयज्ञो ७८ महावीरो ७९ यजमानो ८० नियाजभाग् ८१ ॥१०॥
मन्त्रमूर्ति८२र्मन्त्रबीजं ८३ मन्त्रन्यासश्च ८४ मन्त्रराट् ८५ ।
महामन्त्रो ८६ मन्त्रपति८७ध(र्ध)र्मस्थानं ८८ सुमन्त्रभूः ८९ ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्मन्त्रो ९० मन्त्रसंस्थानो ९१ मन्त्रेड्यो ९२ मन्त्रपूजितः ९३ ।
मन्त्रमात्रः ९४ स्फुरन्मन्त्रो ९५ मन्त्रदेवश्च ९६ मान्त्रिकः ९७ ॥१२।
पञ्चमङ्गलमन्त्रश्च ९८ सर्वमन्त्रावतारवान् ९९ ।
मन्त्रप्रत्यक्षरूपो[1] २०० यस्तस्मै भगवते नमः[2] ॥१३॥

॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते राजनगरवास्तव्यसङ्घ-मुख्य-मा'पनजी'सुश्रूषिते सिद्धनामकोशे द्वितीयशतकप्रकाशः ॥२॥

जगन्नाथो १ जगज्ज्येष्ठो २ जगत्स्वामी ३ जगत्पिता ४ ।
जगन्नेता ५ जगद्धर्ता ६ जगद्बन्धु७र्जगद्गुरुः[3] ८ ॥१॥
जगत्त्राता ९ जगत्पाता १० जगद्रक्षो ११ जगत्सखः १२ ।
जगदीशो १३ जगत्स्रष्टा १४ जगद्वन्द्यो १५ जगद्धितः १६॥२॥
जगत्पति१७र्जगन्मान्यो १८ जगच्छास्ता १९ जगन्मुखम् २० ।
जगच्चक्षु२१र्जगन्मित्रं २२ जगद्दीपो २३ जगत्सुहृत्[3] २४ ॥३॥
जगत्पूज्यो २५ जगद्ध्येयो २६[5] जगद्वि२७ज्जगदर्यमा २८।
जगन्माता २९ जगद्भ्राता ३० जगद्भानु३१र्जगन्मणिः ३२ ॥४॥
जगदर्च्यो[6] ३३ जगच्चिन्त्यो ३४ जगत्काम्यो ३५ जगत्प्रियः ३६ ।
जगद्धेतु३७र्जगत्केतु३८र्जगत्सीमा ३९ जगन्निधिः ४० ॥५॥
जगद्वैद्यो ४१ जगज्ज्योति४२र्जगत्पोषी ४३ जगद्वृषः ४४ ।
जगत्पूषा ४५ जगद्धूर्यो[7] ४६ जगद्बीजं ४७ जगत्तरुः ४८ ॥६॥
जगत्सारो ४९ जगन्मूलं ५० सिद्धार्थः[8] ५१ सिद्धशासनः ५२ ।
सिद्धस्थानः ५३ सुसिद्धान्तः ५४ सिद्धगीः ५५ सिद्धधीः ५६ सुधीः ५७ ॥७
भवाब्ध्यगस्ति५८र्भवहृद५९ भवच्छि६०दपुनर्भवः ६१ ।
कालातीतो ६२ भवातीतो ६३ भयातीतः ६४ कलातिगः ६५ ॥८॥
गुणातीतो ६६ रजोऽतीतः ६७ कल्पातीतः ६८ कुलातिगः ६९ ।
वर्णातीतः ७० पदातीतो ७१ मार्गातीतो७२ऽक्षरातिगः ७३ ॥९॥
वाक्यातीतः ७४ स्मयातीतो ७५ वाचोऽतीतो ७६ नयातिगः ७७ ।

---

१. य० संज्ञकप्रतेः प्रथमं पत्रं विनष्टम्, अतो द्वितीयपत्रस्य प्रथमपृष्ठेः प्रारम्भः "त्रप्रत्यक्षरूपो" इत्यतो विद्यते ॥ २. नमः ॥१३॥ द्वितीयशतकप्रकाशः २॥ जं० ॥ ३ °गत्सुहृत् य० ॥ ४. जगद्गुरुः य० ॥ ५. जगद्वि२७र्जगद° जं० ॥ ६. °दर्यो य० ॥ ७. जगदुर्यो जं० ॥ ८. सिद्धार्त्तः य० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्त्यतीतः ७८ स्पृहातीतो ७९ न्यासातीतो ८० जनातिगः ८१ ॥१०॥
छन्दोऽतीतो ८२ जनातीतो ८३ लोकातीतो ८४ लयातिगः ८५ ।
योगातीत८६स्तपोऽतीतो ८७ व्रतातीतो ८८ यमातिगः ८९ ॥११॥
ध्यानातीतो९० मनोऽतीत९१श्चिन्तातीत९२श्चयातिगः ९३ ।
लेपातीतो ९४ गदातीतो ९५ कामातीत९६स्तमोऽतिगः ९७ ॥१२॥
वेदातीतो ९८ वयोऽतीतः ९९ सर्वातीतश्च ३०० यः प्रभुः ।
कर्मेन्धनानि दह्यन्ते तस्य ध्यानाग्निना क्षणात्[1] ॥१३॥

**॥ इति महोपाध्यायश्रीयशोविजय-गणिसमुच्चिते सङ्घमुख्य-सा'पनजी-' सुश्रूषिते श्रीसिद्धनामकोशे तृतीयशतकप्रकाशः ॥३॥**

अमृतात्मा१ऽमृतोद्भूतो२ऽमृतस्रष्टा३ऽमृतोद्भवः ४ ।
अमृतौघो५ऽमृताधारो६ऽमृताङ्गो७ऽमृतसंस्थितिः ८ ॥१॥
कृतज्ञः ९ कृतकृत्यश्च १० कृतधर्मा ११ कृतक्रतुः १२ ।
कृतवेदः १३ कृतात्मा च १४ संस्कृताप्ति१५रसंस्कृतः १६ ॥२॥
भावः १७ स्वभावो १८ निर्वर्गो १९ मुख्यवर्गो२०ऽपवर्गभाग् २१ ।
सत्ता २२ पदार्थः २३ पूर्णार्थो २४ लक्षणार्थ२५स्त्रिलक्षणः २६ ॥३॥
पद्मेशः २७ पद्मसम्भूतिः २८ पद्मभूः २९ पद्मविष्टरः ३० ।
हृत्पद्मस्थो ३१ महापद्मः ३२ पद्मः ३३ पद्मासनोदयः ३४ ॥४॥
हिरण्यगर्भः ३५ श्रीगर्भो ३६ विरञ्चि३७र्द्रुहिणश्च ३८ कः ३९ ।
वेदगर्भः ४० शतानन्दः ४१ पुराणज्ञः ४२ पुराणगः ४३ ॥५॥
विश्वरेता ४४ हंसगति४५र्महाहंसश्च[2] ४६ हंसराट् ४७ ।
प्रजापतिः ४८ प्रजानाथो ४९ हिरण्येशो ५० हिरण्मयः ५१ ॥६॥
हृषीकेशो ५२ नभःकेशः ५३ स्थाणु५४र्जिष्णुः ५५ पितामहः ५६ ।
भिषग्वरो५७ऽगदङ्कारो ५८ वैद्यो ५९ ध्वस्तगदो६०ऽगदः ६१ ॥७॥
वरदः ६२ पारदः ६३ श्रीदः ६४ सिद्धिदः ६५ सर्वशर्मदः ६६ ।
वर्षीयान् ६७ वृषभो ६८ वर्षो ६९ वृषकेतु७०र्वृषध्वजः ७१ ॥८॥
महाबोधि७२र्वर्द्धमानो ७३ महर्द्धि७४र्वृद्धिलक्षणः ७५ ।
अहानि-वृद्धि७६स्तुल्यात्मा ७७ त्रिलिङ्गो७८ऽतिस्त्रिलिङ्गकः ७९ ॥९॥

---

१. °त् ॥१३॥ श्रीसिद्धनाम° जं० ॥ २. °गति४५र्धर्महंस° जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरक्षः ८० कृतभूरक्षो ८१ रक्षोहन्ता ८२ स्वरक्षितः ८३ ।
[1]आत्मेक्षणः ८४ क्षणमयः ८५ शुभंयुः ८६ पुष्कलेक्षणः ८७ ॥१०॥
त्रयीमय८८स्त्रयीकेतु८९र्धारावाही ९० त्रयीधरः ९१ ।
त्रयीतेजोमय९२स्त्रेता ९३ दशपारमितेश्वरः ९४ ॥११॥
त्रयीतनु९५स्त्रयीगीतः ९६ पिटकत्रयदेशितः[2] ९७ ।
त्रिस्थ९८स्त्रिकरणोन्मुक्त९९स्त्रिब्रह्मप्रकृतिः ४०० श्रिये[3] ॥१२॥

॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते सङ्घमुख्य-सा 'पनजी'सुश्रूषिते श्रीसिद्धनामकोशे चतुर्थशतकप्रकाशः ॥४॥

शक्तो १ निरेजः २ कूटस्थः ३ शीलेशः ४ शीलनायकः ५।
शैलेशः ६ प्राप्तशैलेशि७र्निश्चयी८ व्यवहारमुक् ९ ॥१॥
अनुपाधि१०रुपाधिच्छित् ११ सर्वोपाधिविशुद्धिमान् १२ ।
अनाचार्यो१३ऽनुपाध्यायो१४ऽगुरु१५र्गुरुशिरोमणिः १६ ॥२॥
स्वयम्बुद्धो १७ विबुद्धश्च १८ सम्बुद्धो १९ बुद्धजागरः २० ।
तुरीयावस्थित२१स्तुर्यः २२ सिद्धजागरिकात्रयः २३ ॥३॥
अशस्त्रः २४ शस्त्रमुक् २५ शस्त्रोज्झितः २६ शस्त्रविवर्जितः २७ ।
अशस्त्री २८ परमाशस्त्रो२९ऽशस्त्रभी३०रकुतोभयः ३१ ॥४॥
दयासिन्धु३२र्दयापालो ३३ दयनेता ३४ दयानिधिः ३५ ।
दयालः ३६ स्वदयाचिह्नो ३७ दयाश्रेष्ठो ३८ दयोदयः ३९ ॥५॥
दयास्थायीं ४० दयास्थानं ४१ सर्वशुद्धदयामयः ४२ ।
दयापात्रं ४३ दयामात्रो ४४ दयाव्याप्तो ४५ दयोन्नतिः ४६ ॥६॥
आत्माराम४७श्चिदाराम४८श्चिद्रामो ४९ रामसत्तमः ५० ।
श्रीरामः ५१ केवलारामो ५२ दयारामो ५३ विरामवान् ५४ ॥७॥
अजन्मरामो५५ऽति(ती)रामो ५६ महारामो ५७ मनोरमः ५८ ।
स्वतोरामः ५९ स्वयंरामः ६० केवलो[4] राम ६१ एव च ॥८॥
महेन्द्रार्च्यो ६२ महेन्द्रेड्यो ६३ महेन्द्रो६४ऽतीन्द्रियार्थदृक् ६५ ।
अनिन्द्रियो६६ऽहमिन्द्रार्च्यो६७ऽतीन्द्रो६८ऽतीन्द्रियदृक् ६९ स्वदृक् ७०॥ ९

---

१. आत्येक्षणः जं० ॥ २. पितृकं य० ॥ ३. श्रिये ॥१२॥ श्रीसिद्धनामकोशे चतुर्थप्रकाशः ॥४॥ जं० ॥ ४. केवलाराम जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतात्मा ७१ भूतभृद् ७२ भूतरक्षी ७३ भूताभयङ्करः ७४ ।
प्रभवो ७५ विभवो ७६ भूताधारो ७७ भूतानुपग्रहः ७८ ॥१०॥
अन्तप्राणो ७९ महाप्राणः ८० प्राणदः ८१ प्राणितेश्वरः ८२ ।
प्राणेशः ८३ प्राणदयितः ८४ प्राणाग्र्यः ८५ प्राणवल्लभः ८६ ॥११॥
प्राणोत्तरः ८७ प्राणगति८८रप्राणः ८९ प्राणिनामिनः ९० ।
अग्राह्यो ९१ गहनं ९२ गूह्यं ९३ प्रणवः ९४ प्रणवोत्सवः ९५ ॥१२॥
प्राणायामप्रकटितः ९६ प्राणमन्त्रो ९७ जपञ्जपः ९८ ।
द्रष्टा ९९ कलङ्कलीभावः ५०० सिद्धः सिद्धिं ददातु नैः ॥१३॥

**॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते राजनगरवास्तव्यसङ्घ-मुख्य-सा'पनजी'सुश्रूषिते श्रीसिद्धनामकोशे पञ्चमशतकप्रकाशः ॥५॥**

महाशिवो १ महाज्योति२र्महासिद्धो ३ महाध्रुवः ४ ।
महादृष्टि५र्महाप्राप्ति६र्महारूपो ७ महायशाः ८ ॥१॥
महात्राता ९ महाचक्षु१०र्महाधारो ११ महाविधिः १२ ।
महाविभु१३र्महासारो १४ महावेदो १५ महागमः १६ ॥२॥
महोपास्यो १७ महाध्येयो १८ महाव्यापी १९ महामहः २० ।
महानाथो २१ महाज्येष्ठो २२ महास्वामी २३ महासुहृत् २४ ॥३॥
महास्रष्टा २५ महावन्द्यो २६ महामान्यो २७ महामुनिः २८ ।
महापूज्यो २९ महाभ्राता ३० महाकाम्यो ३१ महाप्रियः ३२ ॥४॥
महाहेतु३३र्महासीमा ३४ महावैद्यो ३५ महौषधः ३६ ।
महामार्गो ३७ महान्यासो ३८ महापूषा ३९ महाचलः ४० ॥५॥
महामूर्ति४१र्महाचक्री ४२ महाराजो ४३ महानयः ४४ ।
महाकीर्ति४५र्महास्फूर्ति४६र्महासत्यो ४७ महातपाः ४८ ॥६॥
महामुक्ति४९र्महात्यागी ५० महाब्रह्मा ५१ महाशुचिः ५२ ।
महाधातु५३र्महाप्रष्ठो ५४ महायज्वा ५५ महाहविः ५६ ॥७॥
महाव्योम ५७ महाबीजं ५८ महामात्रो ५९ महाधृतिः ६० ।
महाकृती ६१ महाभावो ६२ महावर्गो ६३ महाधरः ६४ ॥८॥
महासनो ६५ महाभूति६६र्महेशश्च ६७ महावृषः ६८ ।
महाशिष्टि६९र्महादेशो ७० महाज्ञश्च ७१ महाव्रतः ७२ ॥९॥

---

१. नः ॥१३॥ श्रीसिद्धनामकोशे पञ्चमशतकः प्र° जं० ॥ २. महाक्रान्ति६१र्महा° य० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महागति७३र्महास्थाष्णु७४र्महावृद्धि७५र्महाक्षणः ७६ ।
महागुरु७७र्महाणुश्च ७८ महावेश्मा ७९ महावशी ८० ॥१०॥
महाशक्रो ८१ महाशीलो ८२ महाचार्यो ८३ महागुणः ८४ ।
महादयो ८५ महापात्रो ८६ महाव्याप्ति८७र्महोन्नतिः ८८ ॥११॥
महार्णवो ८९ महामेरु९०र्महाशास्त्रो ९१ महाधनः ९२ ।
महावसु ९३ महावेदो ९४ महापोतो ९५ महागृहम् ९६ ॥१२॥
महादित्यो ९७ महासोमो ९८ महाप्रज्ञाकर९९स्तथा ।
महातर्कावतारश्च ६०० श्रेयांसि वितनोतु नेः[1] ॥१३॥

॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते [राजनगरवास्तव्य] सङ्घमुख्य–सा 'पनजी' सुश्रूषिते श्रीसिद्धनामकोशे षष्ठशतकप्रकाशः ॥६॥

विजयो १ वैजयन्तश्च २ जयन्त३श्चापराजितः ४ ।
सर्वार्थसिद्ध५स्तीर्थार्चः ६ स्वयम्भूरमणो ७ जयः ८ ॥१॥
सदातनः ९ सदाज्ञानः१० सदासत्यः ११ सदाश्रयः १२ ।
सदासुहृत् १३ सदासौख्यः १४ सदाविद्यः १५ सदोदयः १६ ॥२॥
सदायोगः १७ सदाभोगः १८ सदातृप्तः १९ सदानघः २० ।
सदास्नातः २१ सदालेपः २२ सदोद्द्योतः २३ सदास्थितिः २४ ॥३॥
अतुल्यो२५ऽसदृशो२६ऽकल्पो२७ऽसमानो२८ऽसवया २९ नगः ३० ।
अगो ३१ नगाधिराजश्च३२ स्थावरो ३३ जङ्गमाश्रयः ३४ ॥४॥
प्रक्षीणबन्धः ३५ कामारिः ३६ प्रमाणपरिधिः[2] ३७ प्रधीः ३८ ।
कृतानन्दः ३९ कृतामोदः ४० कृतशर्मा ४१ कृतोदयः ४२ ॥५॥
कृतान्तसृट् ४३ कृतान्तच्छित् ४४ कृतान्तज्ञः ४५ कृतान्तहृत् ४६ ।
समयः ४७ समयातीतो ४८ विषमो ४९ विषमास्त्रजित् ५० ॥६॥
जितारि५१रजितो ५२ धर्ममेघो५३ऽमोघश्च ५४ शम्भवः ५५ ।
सुप्रतिष्ठो ५६ दृढरथो ५७ विश्वसेनो ५८ महारथः ५९ ॥७॥
चिन्तामणिः ६० सुरमणिः ६१ कामकुम्भः ६२ सुरद्रुमः ६३ ।
रोहणो ६४ दक्षिणावर्तः ६५ कामधेनु६६रकश्मलः ६७ ॥८॥
चिन्तितार्थप्रद६८श्चैत्य६९श्चिरच्छाय७०श्चिरस्थितिः ७१ ।
जैवातृको७२ऽनभिज्ञानो ७३ विस्पर्शः ७४ स्पर्शगोचरः ७५ ॥९॥

---

१. नः ॥१३॥ श्रीसिद्धनामकोशे षष्ठशतप्रं जं० ॥ २. प्रमाणापरिधिः जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असम्मोहाप्य ७६ उन्नेयः ७७ पुरुहूतो७८ऽवतारमुक्त् ७९ ।
दशलाक्षणिको ८० देशो८१ऽनुद्देशो८२ऽनुपचारभूः ८३ ॥१०॥
बन्धुरो ८४ रुचिर८५श्चारु८६र्बन्धू ८७ रुच्यश्च ८८ शोभनः ८९ ।
शतशास्त्रः ९० शतर्क्षश्च ९१ शततारः ९२ शताध्वगः ९३ ॥११॥
शतोपायः ९४ शताख्यानः ९५ शतकीर्तिः ९६ शताह्वयः ९७ ।
शतगृह्यः ९८ शतोद्गीथः ९९ शतवृत्तिः ७०० श्रियेऽस्तु नः ॥१२॥

॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते [राजनगरवास्तव्य] सङ्घमुख्य-सा 'पनजी' सुश्रूषिते श्रीसिद्धनामकोशे सप्तमशत[क]प्रकाशः ॥७॥

धीशो १ धियः पति२र्धीन्द्रो ३ धिषणः ४ शेमुखीधरः ५ ।
धीगणो ६ धीसमूहश्च ७ गीष्पतिश्च ८ गिरांपतिः ९ ॥१॥
वाचस्पति१०र्वचः स्रष्टा ११ बृहदात्मा १२ बृहस्पतिः १३ ।
बृहदारण्यको[द्]द्योती १४ मनीषीशो १५ मनीषितः १६ ॥२॥
नयोत्क्रान्तो १७ नयोद्भेदी १८ ज्ञानगर्भः १९ प्रभास्वरः २० ।
रत्नगर्भो २१ दयागर्भः २२ पुण्यगर्भः २३ स्वर्गगर्भगः २४ ॥३॥
लक्ष्मीशः २५ कमलानाथो २६ निर्मन्तु२७र्मन्तुमोचनः २८ ।
आशामोचन २९ उद्दाम ३० आशाविश्रामभाजनम् ३१ ॥४॥
धर्मयूपो ३२ धर्मगणो ३३ धर्मनेमि३४रकर्मठः ३५ ।
धर्मचक्रायुधो ३६ धर्मघोषणो ३७ धर्मपोषणः ३८ ॥५॥
स्पृहामुक्तः ३९ स्पृहात्यागी ४० स्पृहापर्शुः ४१ स्पृहोज्झितः ४२ ।
दूरस्थो ४३ दूरदृग् ४४ दूरपथ४५स्तथ्य४६स्तिथिप्रणीः ४७ ॥६॥
अध्यात्मगम्यो४८ऽध्यात्माङ्गो४९ऽध्यात्माप्यो५०ऽध्यात्मलोचनः ५१ ।
अध्यात्माधित्यको५२ऽध्यात्मकैलाशो५३ऽध्यात्मशासनः ५४ ॥७॥
अध्यात्मवासो५५ऽध्यात्मार्चो५६ऽध्यात्मार्को५७ऽध्यात्मभास्करः ५८ ।
अध्यात्मांशु५९र्घनाध्यात्मः ६० स्वाध्यात्मो६१ऽध्यात्मसङ्ग्रहः ६२ ॥८॥
अध्यात्मकोटि६३रध्यात्मसारो६४ऽध्यात्मपरिग्रहः ६५ ।
अध्यात्मसृष्टि६६रध्यात्मपवित्रो६७ऽध्यात्मपारगः ६८ ॥९॥

---

१. °म्मोहाख्य ७६ जं० ॥ २. °स्तु वः ॥१२॥ श्रीसिद्धनाम° जं० ॥ ३. मनीषीष्टो १५ जं० ॥ ४. स्वगर्भगः २४ जं० ॥ ५. स्पृहाघनः ४२ जं० ॥ ६. °त्मसङ्ग्रहः ५४ जं० ॥ ७. °त्मशासनः ६२ जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यात्मपूर्णो६९ऽध्यात्मेष्टो७०ऽध्यात्माढ्यो७१ऽध्यात्मसंश्रयः ७२ ।
अध्यात्मयज्ञो७३ऽध्यात्मेन्द्रो७४ऽध्यात्मेनो७५ऽध्यात्मवासितः ७६ ॥१०॥
अध्यात्मभोग्यो७७ऽध्यात्मेद्धो७८ऽध्यात्माध्वा७९ऽध्यात्मसङ्गतः ८० ।
अध्यात्मरङ्गो८१ऽध्यात्मार्थो८२ऽध्यात्माग्रो८३ऽध्यात्ममन्दिरम् ८४ ॥११॥
अध्यात्मपूतो८५ऽध्यात्मास्थो८६ऽध्यात्माज्ञो८७ऽध्यात्मसंवरः ८८ ।
अध्यात्मस्थो८९ऽध्यात्मधनो९०ऽध्यात्मज्ञो९१ऽध्यात्मविष्टरः ९२ ॥१२॥
अध्यात्मपीठो९३ऽध्यात्मेलो९४ध्यात्मेतो९५ऽध्यात्मसन्ततः ९६ ।
प्राध्यात्मो९७ऽध्यात्मसन्तानो९८ऽध्यात्माढ्यो९९ऽध्यात्मवि८००न्मुदे ॥१३॥

## ॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते [राजनगरवास्तव्य] सङ्घमुख्य-सा'पनजी'सुश्रूषिते श्रीसिद्धनामकोशेऽष्टमशत[क]प्रकाशः ॥८॥

अभो१ऽनदो२ऽरवो३ऽनादो४ऽस्वरो५ऽस्वानो६ऽस्वनो७ऽध्वनिः ८ ।
अवृद्धि९रगुणो१०ऽबिन्दु११रविसर्गो१२ऽलुग१३ऽक्रमः १४ ॥१॥
अहसो१५ऽमातृको१६ऽप्रत्याहारो१७ऽघोषो१८ऽनुपाहितः १९ ।
अनामा२०ऽप्रातिपदिको२१ऽसमासो२२ऽविग्रहो२३ऽग्रहः २४ ॥२॥
अनाख्यातो२५ऽकृदन्त२६श्चातद्धितो२७नणु(?नाप्यु)णादिकः २८ ।
अयोगो२९ऽरूढि३०रस्तोभो३१ऽच्छन्दा३२श्चाप्यनलङ्कृतिः ३३ ॥३॥
अपातो३४ऽलम्बनो३५ऽक्रान्ति३६रराशि३७रनहर्गणः ३८ ।
अनतो३९ऽनुन्नतो४०ऽलग्नो४१ऽनुच्चो४२ऽनीचो४३ऽदिगन्तरः ४४ ॥४॥
अनर्को४५ऽनाटको४६ऽनाट्यो४७ऽविभवो४८ऽतनुभावकः ४९ ।
स्थायो ५० रसो५१ऽश्लथो५२ऽगाथो५३ऽकाव्यो५४ऽगीति ५५रपिङ्गलः ५६॥५
अनिघण्टु५७रनध्यायो५८ऽसंहितो५९ऽवैद्यको६०ऽन्यथः ६१ ।
अग्रामो६२ऽमूर्च्छनो६३ऽवाद्यो६४ऽनेपथ्यो६५ऽनिङ्गितो६६ऽलयः ६७ ॥६॥
पश्यत्यात्मा६८ऽघनो६९ऽभाषो७० ह्यवैस्वरि७१रमध्यमः ७२ ।
अश्वेतो७३ऽपाटलो७४ऽश्यामो७५ऽनीलो७६ऽबभ्रु७७रपीतिमा ७८ ॥७॥

---

१. °भावो ७७ जं० ॥ २. °ध्यात्माग्रो ?ज्ञो) ८२ जं० ॥ ३. °ध्यात्मेजो ९४ ध्यात्मेजो(?ज्यो) ९५ जं० ॥ ४. प्राध्याप्यो ९७ य० ॥ ५. °न्मुदे ॥१३॥ श्रीसिद्धकोशेऽष्टम° जं० ॥ ६. अयोगो२९ऽभूमि३०रस्ताभो ३१ जं० ॥ ७ °कायो य० ॥ ८. °रनध्येयो ५८ जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिक्तो७९ऽमधुरो८०ऽनम्लो८१ऽकषायो८२ऽलवणो८३ऽकटुः ८४ ।
असौगन्ध्यो८५ऽपदौर्गन्ध्यो८६ऽनुष्णो८७ऽशीतो८८ऽखरो८९ऽमृदुः ९० ॥८॥
अस्निग्धो९१ऽगौरवो९२ऽलूक्षो९३ऽसंस्थानो९४ऽलघु९५रस्मयैः ९६ ।
अवेदो ९७ वेदसङ्गीतः ९८ श्रीयुक्तः ९९ श्रीपतिः १०० श्रिये ॥९॥[1]

॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते [राजनगरवास्तव्य] सङ्घमुख्यसाह'पनजी'सुश्रूपिते श्रीसिद्धनामकोशे नवमशतकप्रकाशः ॥९॥

आदिदेवो १ युगादीशो २ युगेशो ३ युगपो ४ युगः ५।
उपज्ञा ६ समयोपज्ञ७मप्रत्यूहो ८ महाबलः ९ ॥१॥
शिवशाति१०र्महाशान्ति११र्निर्वृतः १२ संवृतो१३ऽवृतः १४ ।
अरहा १५ अरुहो१६ऽरोह १७ आद्यध्येयः १८ पदोत्तरः १९ ॥२।
आत्मरक्षा२०ऽऽत्मकवच२१मात्मत्राता२२ऽऽत्मपञ्जरम् २३ ।
अकुण्ठ२४स्त्र्यम्बकः २५ सार्वः २६ शर्वः २७ सर्वेश्वरो २८ मृडः २९ ॥३॥
आद्येडच ३० आद्यचारित्र३१माद्यमन्त्रः ३२ ऋगादिमः ३३ ।
आद्यवा३४गाद्यभू३५राद्यनेता३६ऽऽद्यर्षि३७र्वृषादिमः ३८ ॥४॥
आद्यमेघः ३९ प्रधानाद्यः ४०क्ष्माद्यो४१ नाद्यो४२ निराक्रियः ४३ ।
नन्द्यो ४४ नादीनवो ४५ नन्द्यावर्तो४६ऽर्हः ४७ स्वस्तिको४८ऽस्तिकः ४९ ॥५॥
प्रोढो५०ऽनूढो ५१ मन्त्रशिखो ५२ दीप्तो५३ऽरिघ्नो ५४ निरन्तरः ५५ ।
भद्रो५६ऽनीद५७गनित्थंस्थो५८ऽयुतसिद्धः ५९ सुसंयुतः ६० ॥६॥
अलोकस्पृग् ६१ लोकमध्यो ६२ लोकमान्यो ६३ विसंशयः ६४ ।
जागरूकः ६५ सदोन्निद्रो ६६ निस्तन्द्रो ६७ निःप्रमीलदृग् ६८ ॥७॥
अनिमेषो ६९ निमेषेन्द्रः ७० प्रमाकर्ता ७१ प्रमाप्यकः ७२ ।
प्रमाणं च ७३ प्रमासम्प्रदानं ७४ शुद्धप्रमाश्रयः ७५ ॥८॥
प्रमापादानः ७६ सम्बन्धी प्रमायाः ७७ स्वप्रमोद्गतः ७८ ।
मार्गो ७९ मार्गप्रभु८०र्मार्गस्वामी ८१ मार्गविशोधकः ८२ ॥९॥

---

१. °यः ९६ । अना९७ऽस्त्र्य९८ऽनपुषा संज्ञः ९९ श्रिये सिद्धान्तदेवता १०० ॥९॥ य० ॥ २. ॥९॥ श्रीसिद्धनाम° जं० ॥ ३. °शतप्र° य० ॥ ४. युगनायकः ४। उपज्ञा ५ जं०, मूलगत 'युगपो ४ युगः ५' इति शब्दद्वयस्थाने जं० प्रतौ 'युगनायकः' इत्येकशब्दोल्लेखाद् या शब्दक्रमाङ्कविषये एकाङ्कन्यूनता जाता सा नवमश्लोकोत्तरार्द्धगतशब्दचतुष्कस्थाने शब्दपञ्चकोल्लेखात् क्रमाङ्कसंवादिनी बभूव ॥ ५. मार्गो ७८ मार्गेश७९सन्मार्गौ८० मार्गदृग्८१ मार्गशोधकः ८२ ॥९॥ जं० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


एकधी८३रेकपू८४रेकवेश्मै८५कस्थिति८६रेकभूः ८७।
एकोद्भव८८श्चैकमार्गः ८९ एकधामै९०कशासनः ९१ ॥१०॥
एकातपत्र ९२ एकाज्ञ ९३ एकाग्र९४श्चैकमन्दिरः ९५।
गभस्ति९६स्तरणि९७स्तारः ९८ सविता ९९ ध्वान्तनाशनः १००० ॥११॥
चतुष्कभा१गष्टगुणो २ दीनपो ३ भक्तवत्सलः ४।
कृपालुः ५ स्फीतकरुणो ६ धीरः ७ श्रीरमणः ८ श्रिये ॥१२॥

→[1] ॥ इति महोपाध्यायश्रीयशोविजयगणिसमुच्चिते [राजनगर-वास्तव्य]सङ्घमुख्य-सा'रतन'सुत-सा'पनजी'सुश्रूषिते श्रीसिद्धनामकोशे दशमशतकप्रकाशः ॥१०॥

॥ सम्पूर्णमिदं श्रीसिद्धसहस्रनामप्रकरणम् ॥←

[2]अष्टोत्तरं नामसहस्रमेतत् पठन्ति ये प्रातरपप्रमीलाः।
ते स्वर्गलीलामनुभूय भूयः सिद्धालयं यान्ति न संशयोऽत्र ॥१॥
ग[3]च्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशु-
स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥२॥

॥ [4]इति श्रीसिद्धनामानि[5] ॥

---

१. → ← एतच्चिह्नद्वयान्तर्गतः पाठो जं० संज्ञकप्रतौ नास्ति ॥ २. उपेन्द्रवज्राछन्दः ॥ ३. शार्दूलविक्रीडितच्छन्दः । उपेन्द्रवज्रा-शार्दूलविक्रीडितच्छन्दसौ विहाय शेषरचनाऽनुष्टुप्छन्दोमयो ज्ञेया ॥ ४. 'इति श्रीसिद्धनामानि' इति य० प्रतौ नास्ति ॥ ५. °नि ॥ लिखितं राजनगरे सं० १७३९ वर्षे इति श्रेयः ॥ इति जं० प्रतौ लेखकलिखिता पुष्पिकाऽस्ति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अनुबन्धफलगर्भा श्रीगौतमस्तुतिः ।

संपादक

पं. बाबुभाई सवचंद शाह

पं. हरिशंकर अंबाशंकर पंड्या

भगवान महावीरना प्रथम शिष्य श्रीगौतमगणधरनी स्तुतिरूप आ कृति चमत्कारिक अने आल्हादक छे. गौतमस्वामीनुं नाम जैनसंघमां अनेक रोते मंगळदायक गणवामां आवे छे. आथी ज अनेक स्तुतिओ स्तोत्रो तेमज रासो वगेरे तेमना नामथी उपलब्ध छे.

तेओ जन्मे ब्राह्मण होवा छतां भगवान महावीरनो एक ज वार उपदेश सांभळी तेमणे जैनधर्म अंगीकार कर्यो हतो. अने आजीवन तेनुं पालन करी तेओ मोक्षगामी बन्या हता.

प्रस्तुत कृतिना कर्ता नंदिधर्मगणि छे. कवि प्रतिष्ठासोमविरचित **सोमसौभाग्य काव्य** (प्रकाशक, जैन ज्ञानप्रसारक मण्डळ, मुंबाई, ईस्वीसन १९०५)ना दशमा सर्गना श्लोक ६० (पानुं १९२)मां कर्ता विषे नीचे प्रमाणे परिचय मळे छे. आ सिवाय तेमने अंगे अथवा तेमनी बीजी कृतिओ अंगे माहिती उपलब्ध थई शकी नथी.

**सद्व्याख्यानकलाचमत्कृतसभो रत्नप्रभः पण्डितः**
**शीलप्रोज्ज्वलशीलभद्रविबुधश्चारित्रिणामग्रणीः ।**
**तत्तद्दुर्गमशास्त्रपाठनकलास्पृक् नन्दिधर्मस्तथा**
**त्रेताग्निप्रतिमास्त्रयस्त्रिभुवने भान्ति स्म तेजोभरैः ॥६०॥**

"उत्तम व्याख्यानकळाथी सभाने चमत्कार पमाडनारा पण्डित रत्नप्रभसूरि, उज्ज्वल शीलनुं आचरण करनार पंडित शीलभद्रसूरि, अने चारित्रीओमां अग्रेसर तथा ते ते दुर्गम शास्त्रोने भणाववानी कळाने धारण करनारा **नंदिधर्मसूरि** आ त्रणे आचार्यो त्रणे जगतमां पोताना अपूर्व तेजना समूहथी त्रेता अग्निनी जेम शोभता हता"

उपरना श्लोकमां "दुर्गम शास्त्रोने भणाववानी कळाने धारण करनारा" आ प्रमाणे विशेषण आपवाथी तेओ अपूर्व कोटिना विद्वान थयेल होय तेम जणाय छे.

प्रस्तुत कृतिनी संक्षिप्त रचनामां पण तेमणे व्याकरणमां आपेल धातुओना मुख्य मुख्य सघळा अनुबंधोनुं फल गर्भित रीते समाई जाय तेवा धातुओना प्रयोगोनी गुंथणी करवा पूर्वक श्रीगौतमस्वामीनी स्तुति करेल छे.

स्तुतिना अवचूरिकर्ता पण असाधारण विद्वान छे. तेओए स्तुतिकारना सघळा प्रयोगोने संक्षेपथी पण विशद रीते अवचूरिमां वर्णव्या छे. तेमणे अंते पोतानुं नाम सूचवेल नथी आथी ते अंगे प्रकाश पाथरी शकायो नथी.

आ कृतिनुं संपादन बे प्रतिओने आधारे करवामां आवेल छे.

(१) लालभाई दलपतभाई भारतीय संस्कृति विद्यामन्दिर, अमदावाद. आ ज्ञानभंडारनी प्रतिनो क्रमांक १५९५४ छे. प्रतिनां पत्र २ छे. परिमाण. २६×११.५ से. मी. छे. प्रति सुवाच्य तेमज आकर्षक रीते लखायेली छे. परंतु पानुं चोंटी गयेल होवाथी केटलाक अक्षरो वांची शकाया न हता जे बीजी पाटणनी प्रतिने आधारे पूर्ण करवामां आव्या छे. प्रति पंचपाठमां लखायेली छे. आ प्रतिनी ला. संज्ञा राखेली छे.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) आ प्रति श्री हेमचन्द्राचार्य ज्ञानभंडार, पाटणमां रहेल प्रवर्तक श्रीकान्तिविजयजी ज्ञानभंडारनी छे. तेना नंबर १२२९६ छे. पत्र. १ छे. परिमाण २६।५×११।५ से. मी. छे. प्रति सूक्ष्म अक्षरथी पंचपाठमां सुवाच्य रीते लखायेली छे. आ प्रतिनी पा. संज्ञा राखवामां आवेली छे.

प्रथम प्रतिमां नव श्लोकमां स्तुति समाप्त थाय छे. त्रीजी प्रतिमां स्तुतिना दश श्लोक छे. आठमा अने नवमा श्लोकनो भावार्थ लगभग सरखो छे. पण शाब्दिक रचनामां फेरफार छे. दशमो श्लोक उपसंहार-सूचक छे.

ला. द. भा. सं. विद्यामंदिरवाळी प्रतिमां स्तुतिनी अवचूरि विस्तारथी आपवामां आवी छे. परंतु कोई कोई स्थाने साधारण अशुद्धि छे. पाटणवाळी प्रतिमां अमुक अमुक स्थाने अवचूरि संक्षिप्त करेली छे. जे पाठांतर उपरथी जोई शकाशे. पाटणवाळी प्रतिमां आद्यमाथी दशमा श्लोक सुधीनी अवचूरि भिन्नतावाळी छे. जे आमां पाछळ आपवामां आवी छे. अवचूरि होवाथी स्तुतिनो भावार्थ समजवामां सरळता थाय छे.

आ संपादनमां नीचे प्रमाणे पुस्तकोनो उपयोग करवामां आवेल छे.

(१) श्री सिद्धहेमचन्द्र व्याकरण.
(प्रकाशक : आणंदजी कल्याणजी पेढी. अमदावाद. वि. सं. १९९१)

(२) श्री सिद्धहेम शब्दानुशासन. (प्रकाशक : जैन ग्रन्थ प्रकाशक सभा. अमदावाद. वि. सं. १९९८)

(३) श्री हैमप्रकाश महाव्याकरण उत्तरार्ध, (प्रकाशक : श्री श्रुतज्ञान अमीधारा ज्ञानमन्दिर. मु. वेडा. वि. सं. २०१०)

(४) श्री हैमबृहत्प्रक्रिया (प्रकाशक : हेमचन्द्र ग्रन्थमाला, अमदावाद ई. स. १९३१)

(५) सिद्धान्तकौमुदी व्याकरण.

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# श्रीगौतमस्तुतिः अनुबन्धफलगर्भा ।

श्रीगौतमाय नमः ।

**श्रीवर्धमानशिष्याग्रणीर्महिमधाम ! गौतमाह्वगुरो ! ।**
**अनुबन्धफलश्लोकैस्त्वामज्ञोऽपि स्तुवन्नस्मि ॥१॥ आर्या ॥**

अस्यावचूरिर्लिख्यते, यथा–

हे *श्रीगौतमाह्वगुरो ! अनुबन्धा अकारादिहैकारपर्यन्तानां यत्फलं तदाधारत्वेनाधारस्याधेयोपचारात् फलमेव ये प्रयोगाः तेषां तैर्वा ये **श्लोका** वृत्तविशेषास्तैः कृत्वा **त्वामज्ञोऽप्यहं स्तुवन्नस्मीति** योगः । अत्र **श्रीवर्धमान-शिष्याग्रणी**रिति पदं श्रीवीरस्येव श्रीगौतमस्यापि भृशं स्तुत्यर्हतां प्रतिपादयति । **महिमे**त्यादि तु **यदज्ञोऽ**प्यनन्तगुणं भगवन्तं स्तोतुं शक्नोति, तत्र [1]भगवद्धेतुरित्यर्थं व्यनक्ति तथा श्लोकैरिति पदं प्राय आर्यानिबद्धायामप्यस्यां स्तुतौ न दुष्टम् ।

"भवइ य इत्थ सिलोगो पेहेइ हिआणुसासणं" इत्यादावपि तथा दर्शनात् । [3]बन्धं वृत्तरचनामनु लक्षीकृत्य ये फलभूताः श्लोका [4]यशांसि [5]तैर्हेतुभिः काव्यं भवतीत्य-र्थान्तरसूचनाच्च । न च [6]यशसां [7]काव्यफलभूतत्वमयुक्तं, "[8]काव्यं यशसे" इत्यादिवच-नात् । अथानुबन्धाः–अकारः सर्वत्र उच्चारणार्थः । यथा "असक् भुवि" (अदा० है. बृ.प्र.पृ.५४२) वर्तमा० मिवि **अस्मी**ति ॥१॥

[9]अथ प्रस्तुतस्तुतिमाह—

**भिन्नेधमानमुद् यो भजते [10]नन्दन् भवन्तमस्त्वाऽन्यत् ।**
**विष्णुमसित्वा तमचिक्रीडत् श्रीर्नीविजच्चै[11]स्मात् ॥२॥**

**'भिन्ने'**त्यादि । स्निह्यद्वर्धमानहर्षो[12]ऽतएव **नन्दन्** समृद्धिमान् । यः [13]कश्चि-दन्यद् गृहकार्यचिन्तनादि **अस्त्वा** क्षिप्त्वा भवन्तं **भजते** । तं नरं **श्रीर्लक्ष्मीर्विष्णुं स्वप्राणप्रियमसित्वा** मुक्त्वा**ऽचिक्रीडत्** व्यलीलसदिति । [14]न(नु) यथा स्वप्राणेशं[15]

*हे गौ० पा. । १. ०हपर्यन्तानाम् पा. । २. भगवानेव हेतु० पा. । ३. अथवा बन्धं पा. । ४. कीर्तयः पा. । ५. ०भिरित्यर्थव्यक्तेः पा. । ६. कीर्त्तीनां पा. । ७. काव्यस्य पा. । ८. काव्यं कुर्वीत कीर्तये इत्युक्तेः पा. ।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥ इति सम्पूर्णा कारिका. (का.प्र.प्रथम उ.–२ का. २)

९. अथ स्तुतिमाह पा. । १०. निन्द्यान्यकृत्यमस्त्वा त्वाम् पा. । ११. त्तस्मा० पा. । १२. 'ऽत......मान्' अयं पाठो नास्ति ला. । १३. कश्चिद् गर्हितापरगृहव्यापारं पा. । १४. ननु पा. । १५. ०शमसित्वा पा. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्त्वा श्रीरमुं नरमचिक्रीडत्तथाऽमुमपि मुक्त्वा कदाचिदन्यः कश्चित् क्रीडितो भविष्यतीत्याह– नाविजच्चास्मान्न पृथगभूदित्यर्थः । इह हरिप्रियासंपदोरभेदेन उपन्यासः 'कलासंपदोः कामध्वजे मकरमत्स्ययो'रित्यादिना तथा प्रतिपादनात् । भजते इत्यत्र वर्तमानापरो निर्देशो भगवतो मुक्तिप्राप्तत्वेन साक्षादाश्रयणाऽयोगेऽपि मनसाऽऽश्रयणेप्येतत्फलमित्यर्थव्यक्त्यर्थम् । अचिक्रीडदित्यत्र चातीतत्वेन निर्देशश्चेदविनयं भजसि तर्हि दुःशिष्यो जात एवेत्यादाविव भजननैरन्तर्येणावश्यकफलसद्भावव्यापनार्थः । एवमग्रेऽपि स्वयं ज्ञेयम् ॥२॥

न च भजनमेव फलवदपि तु स्तवनमपीति तत्फलमाह–

**नेन्दोर्यद्वैक्षीज्जगदगमच्च प्राकटीत्तदस्य यशः ।**
**योऽनुद्विग्नमनास्त्वाममोहितः स्तोष्यते नेतः ॥३॥**

'**नेन्दो**'रिति । **हे नेतः !** स्वामिन् । न मुह्यतीति हे **अमोहितर् मूढतामुक्त !** [**अनुद्विग्नमनाः**] अभग्नचेता **यस्त्वां स्तोष्यते** तस्य जनस्य **तद्यशः प्राकटीत्** प्रकटोऽभूत् । यत् **इन्दो**श्चन्द्रप्रकाशान्नावैक्षीदौज्ज्वल्येन न पृथगभूत् । **जगत्** कर्मतापन्नम् **अगमच्च** व्यापच्चेति । मा भूत् स्तुतिकर्तुः स्वात्मनि यशःप्रकाशनादनौचित्यं स्तुतेरुपलक्षणमात्रत्वं च । न च स्तुतिकाल एव यशःप्रादुर्भावोऽपि तु तदभिप्राये प्रागपीति ज्ञापनार्थं च स्तोष्यते इत्यत्र भविष्यन्तीपरो निर्देशः ॥३॥

भजनस्तुत्योरभावे भगवद्वाक्याराधनेऽपि फलमाह—

**त्वदमोग्धृतप्रियङ्कर ! प्रशिश्रियाणापरागवाक्यं यः ।**
**सेवेतैष ऋतीयितविपदापोत्फुल्लसारर्धिम् ॥४॥**

**त्वदित्यादि** । त्वत्सम्बन्धि । न मुह्यति न शास्त्रार्थे विपर्यस्यतीति **अमोग्धृ** अत एव धातूनामनेकार्थत्वात् । ऋतं सत्यं प्रियङ्करं हितं 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' । इत्युक्तेः **प्रशिश्रियाणं** प्रशान्तम् **अपरागं** नीरागं च **वाक्यं** वचो **यः सेवेत** । **एष** जन **ऋतीयितापद्** गतव्यसनः **सन्नुत्फुल्लसारर्धि**मुल्लसत्स्थिरसम्पदम् **आप** लेभे इत्यर्थः । 'अमोग्धृत' इत्यत्र "ऋतो वा तौ च (सि.हे.सू.१-२-४) इति

१. कदाचिद्० पा. । २. नास्ति 'कदाचिद्' पदम् पा. । ३ ०त्त० पा. । ४. ०र्थः पा. । ५. योऽभग्नचेतास्त्वां पा. । ६. ०टय० पा. । ७. यदिन्दो० पा. । ८. ०श्चन्द्रात् पा. । ९. ०रशक्तौ पा. । १०. ०तीति पा. । ११. तथा 'उप० पा. । सिद्धान्तकौमुद्याम् भूधातुस्थले उद्धृतमिदम् 'प्रहाराहारसंहारविहारपरिहारवत्' ॥ इत्युत्तरार्धम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रेण ऋता सह ऋदेव। न च प्रशिश्रियाणेत्यत्र *रेफसंयुक्तेन पकारेण छन्दोभङ्गः शङ्कनीयः। पादादिस्थित[1]रेफसंयुक्तव्यञ्जनेन प्राग्गुरुत्वायोगात्। '[2]अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति' इत्यादावपि तथादर्शनेन[3]।

अथोदाहरणानि–आत् 'आदितः' (सि.हे.सू.४-४-७१) इति सूत्रेण क्तयोरादौ इट्निषेधार्थो, यथाऽत्र 'ञिमिदाच् स्नेहने' (हे.बृ.प्र.पृ.५५२) मिद्। अकर्मकत्वात् 'गत्यर्थाकर्मक०' (सि.हे.सू.५-१-११)इति [आदिना] कर्तरि 'ज्ञानेच्छार्चार्थञीत०' (सि.हे.सू.५-२-९२) इति [आदिना] [4]सति क्ते इडभावात् क्त[5]स्य दस्य च नत्वे **मिन्नेति**।

इत्। 'इङितः कर्तरि' (सि.हे.सू.३-३-२२) [6]सूत्रेण कर्तर्यात्मनेपदार्थो, यथा-'एधि वृद्धौ' (भ्वा०है.बृ.प्र.पृ.५१६) एध् आत्मनेपदित्वाद[7]ानशि [8]शवि [9]मागमे च **एधमानेति**।

ईत् 'ईगितः' (सि.हे.सू.३-३-९५) [10]इत्यनेन फलवति कर्तर्यात्मनेपदार्थो यथा [11]यथा 'भजीं सेवायाम्' (भ्वा०है.बृ.प्र.पृ.५२४) भज् वर्तमाना ते शव्[12] **भजते** इति।

उत् "उदितः स्वरान्नोन्तः" (सि.हे.सू.४-४-९८) इति नागमार्थो यथा–'टु[13]नदु समृद्धौ' (भ्वा०है.बृ.प्र.पृ.५०४) नद् उदित्वान्नोन्तः शत्रादौ च **नन्दन्निति**। 'ऋदुदितः' (सि.हे.सू.१-४-७०) इत्यनेन च नागमार्थो यथा–नद् शतरि। तथा 'भांकू दीप्तौ' (अदादि.है.बृ.प्र.पृ.५४८) भा 'भातेर्डवतुः'(उणादि.सू.६६. सि.कौ.) इति डवति(तौ) उभयत्र घुटि ऋदित्वादुदित्वाच्च नोन्ते **नन्दन् भवन्तम्** इति च।

ऊत् "ऊदितो वा" (सि.हे.सू.४–४–४२) इति क्त्वादौ इड्विकल्पार्थो यथा। 'असूच् क्षेपणे' (है.बृ.प्र.पृ.५५४)। अस्। क्त्वायां विकल्पादिटि **वाऽस्त्वाऽसित्वा चेति**।

---

* 'प्रह्वेर्वा' इति विकल्पेन गुरुत्वविधानात्। इदं सूत्रं गङ्गादासमहोदयैः स्वकीयछन्दोमञ्जर्यां पिङ्गलसूत्रस्थमिति लिखितं परन्तु पिङ्गलसूत्रे क्वापि न दृश्यते। १. ०स्थेन पा.। २. तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि। इति पूर्वार्धम्। पादान्तलघोर्विकल्पेन गुरुत्वे दृष्टान्तरूपेणोद्धृतोऽयं छन्दोमञ्जर्याम्। ३. ०नात् पा.। ४. नास्ति पा.। ५. "रदादमूर्च्छमदः क्तयोर्दस्य च" (सि.हे.सू.४–२–६९)। ६. रीति सू० पा.। ७. (सि.हे.सू.५–२–२०)। ८. शव् मागमादौ च पा. (सि.हे.सू. ३–४–७१)। ९. (सि.हे.सू.४–४–११४)। १०. इति पा.। ११. नास्ति पा.। १२. शवि पा.। १३. 'णिंदु कुत्सायाम्' (है.बृ.प्र.पृ.५०४) निद् 'ऋवर्णव्यञ्जनाद्...'(सि.हे.सू.५-१–१७) इति कर्मणि घ्यणि नोन्ते च निन्द्येति पा.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


**ऋत्** "उपान्त्यस्यासमानलोपि शास्वृदितो ङे" (सि.हे.सू.४-२-३५) इति ङपरे णौ उपान्त्यह्रस्वाभावार्थो यथा–'क्रीडृ 'विहारे' (है.बृ.प्र.भ्वा.पृ.५०१) क्रीड् णिगि अद्यतन्यां 'णिश्रि....'(सि.हे.सू.३-४-५८) इति ङे [2]द्वित्वादौ च प्राग् ह्रस्वाभावादचिक्रीडत् इति ।

**ॠत्** '[3]ॠ[दि]द्....'(सि.हे.सू.३-४-६५) इत्यनेन विकल्पेनाङर्थो यथा–'विजृंकी पृथग्भावे' (है.बृ.प्र.पृ.५५०)विज्, अद्यतन्याम् दिवि[4] अङि पक्षे सिचि वृद्ध्यादौ **चाविजदवैक्षीच्चेति** ।

**ऌत्** । 'ऌदिद्द्युतादि....'(सि.हे.सू.३-४-६४)इत्यङर्थो यथा–'गम्ऌं गतौ' (है.बृ.प्र.पृ.५०८) । गम् अद्यतन्यां [5]दिवि अङि **चागमदि**ति ।

**एत्** । "व्यञ्जनादेर्वोपान्त्यस्यातः" (सि. हे.सू.४-३-४७) इत्यनेन[6] सूत्रेण प्राप्ताया अपि "न श्विजागृशसि क्षण ह्म्येदितः" (सि.हे.सू.४-३-४९) इत्यनेन वृद्धेर्निषेधार्थो यथा–'प्रपूर्वः कटे वर्षावरणयोः' (है.बृ.प्र.स्वा-५००) कट् अद्यतन्यां दिवि सिचि "इट ईति" सिज्लुगादौ च वृद्धेरभावात् **प्राकटीदि**ति ।

**ऐत्** । ''डीयश्व्यैदितः क्तयोः' ([8]सि.हे.सू.४-४-६१) इत्यनेनेडभावार्थो तथा **ओत्** "सूयत्याद्योदितः" (सि.हे.सू. ४–२–७०) इत्यनेन क्तयोर्नकारार्थो यथा उत्पूर्व "ओविजैप् भयचलनयोः" (है.बृ.प्र.पृ. ५६८)विज् क्ते इडभावे क्तस्य नत्वे क्तादेशस्यासत्त्वात् विजो [9]जस्य गत्वे पश्चात् नञ्योगे **चानुद्विग्ने**ति ।

**औत्**–'धूगौदित' (सि.है.सू.४–४–३८)इत्यनेनेड्विकल्पार्थो यथा–'मुहौच् वैचित्त्ये' (है.बृ.प्र.पृ. ५५४) मुह् [10]तृंचि तृनि[11] वा गुणे नञ्योगे इटि पक्षे [12]हस्य घत्वे [13]तुर्धत्वे घस्य[14] गत्वे च **अमोहितृ(तृ) अमोग्धृ** चेति ।

**अनुस्वारः** । 'एकस्वरादनुस्वारेतः (सि.है.सू.४–४–५६) इत्यनेनेडभावार्थो 'ष्टुंग्क् स्तुतौ' (है.बृ.प्र.पृ.५४६) । ष्टु तस्य स्तु[15] भविष्यन्ती स्यते । तथा 'णींग् प्रापणे' णी 'पाठे धात्वादे........'(सि.हे.सू. २–३–९७) इति नी तृचि उभयत्रेडभावे च गुणे च **स्तोष्यते नेतरि**ति च ।

---

१. विहायसा गतौ पा. । २. 'द्विर्धातुः...'(सि.हे.सू.४–१–१) इत्यादिना । ३. 'ऋदिच्छ्रिव...'पा. । ४. पा. प्रतावयं पाठो नास्ति । ५. ला. प्रताविदं नास्ति । ६. नास्ति पा. प्रतौ । ७. 'इट्' इति ला. । ८. क्तक्तवत्वोः । ९. 'चजः कगम्' (सि.हे. सू.२–१–८६) । १०. 'णकतृचौ' (सि.हे.सू. ५–१–४८) । ११. "तृन् शील..." (सि.हे.सू. ५–२–२७) । १२. भ्वादेर्दादेर्घः (सि.हे.सू.२–१–८३) । १३. "अधश्चतुर्थात्तथोर्धः" (सि.हे.सू. २–१-७९) । १४. "तृतीयस्तृतीयचतुर्थे" (सि.हे.सू.१–३–४९) । १५. "षः सोऽष्ट्यै..." (सि.हे.सू .२–३–९८) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ककारो गुणाभावार्थो यथा 'ऋं प्रापणे [च]' (है.बृ.प्र.पृ.४९४) क्तप्रत्यये तथा 'प्रीग्ण् तर्पणे' (है.बृ.प्र.पृ.५८४) प्री 'नाम्युपान्त्य श्री-कृ-गृ-ज्ञः कः (सि.हे.सू.५-१-५४) इति के प्रत्ययस्य कित्त्वाद् गुणाभावे 'संयोगात्' (सि.हे.सू.२-१-५२) इति इयि च 'ऋत(क्षेम)प्रिय........'(सि.हे.सू.५-१-१०५) इति च खः ।

**ख** 'खित्यनव्ययारुषोर्मोन्तो ह्रस्वश्च' (सि.हे.सू.३-२-१११) इत्यनेन मागमार्थो यथा प्रियं करोतीति । 'क्षेमप्रियमद्रभद्रात्खाण्' (सि.हे.सू.५-१-१०५) इति खे मागमे गुणे **प्रियंकरे**ति ।

**ग** । 'इगितः' (सि.हे.सू. ३-३-९५) इत्यनेनात्मनेपदार्थो यथा प्रात् 'श्रिग् सेवायाम्' (है.बृ.प्र.पृ.५२२) श्रि कर्तरि [3]कानप्रत्यये [4]द्वित्वादौ च **प्रशिश्रियाणे**ति ।

**घः** । 'क्तेऽनिटश्चजोः कगौ घिति' (सि.हे.सू.४-१-१११) इत्यनेन कत्वगत्वार्थो यथा–'रञ्जो रागे' (है.बृ.प्र.पृ.५२४)रञ्ज् । रज्यतेऽनेन 'व्यञ्जनाद् घञ्' (सि.हे.सू.५-३-१३२) इति करणे घञि(ञ्)'घञ् (ञि) भावकरणे' (सि.हे.सू.४-२-५२) इत्यनुस्वाँरलुकि । 'वचंक् भाषणे' (है.बृ.प्र.पृ.४५०) वच् 'ऋवर्णव्यञ्जनाद् घ्यण्' (सि.हे.सू.५-१-१७) इति घ्यणि उभयत्र प्राग् वृद्धौ गत्वे कत्वे च **रागवाक्यं** चेति ।

**ङ** "इङितः कर्तरि" (सि.हे.सू.३-३-२२) इत्यात्मनेपदार्थो गुणाभावार्थश्च यथा–'सेवृङ् सेवने' (है.बृ.प्र.पृ.५२०) सेव् सप्तम्या ईत शवि **सेवेते**ति । तथा 'ऋति(त)घृणा–गति–स्पर्धेषु' (है.बृ. प्र.पृ. ५०३) ऋत् "ऋतेर्ङीयः" (सि.हे.सू. ३-४-२) इति ङीये गुणाभावे क्तादौ च **ऋतीयिते**ति ।

**ञिः** "ज्ञानेच्छा[र्चा]र्था(र्थे)ञीच्छील्यादिभ्यः क्तः" (सि.हे.सू. ५-२-९२) इत्यनेन सति क्तार्थो ञस्तु वृद्ध्यर्थो यथा उत्पूर्वो'दल ञिफला विशरणे' (है.बृ. प्र.पृ.५०९) फल् सति क्ते फुल्लोत्फुल्ल "क्षीव....फुल्लोत्फुल्ल" ( हैमप्रकाश.पृ. ८६५) इति निपाते **चोत्फुल्ले**ति । तथा 'सृं गतौ' (है.बृ.प्र.पृ.४९४) । सृ "सर्त्तेः स्थिरव्याधिबलमत्स्ये" (सि.हे.सू. ५-३-१७) इति घञि वृद्धौ च **सारे**ति । अत्र साधनिकाविस्तरः स्वयं ज्ञेयोऽनुबन्धफलमात्रप्रकटनार्थत्वादस्या एवमग्रेऽपि ॥४॥

---

१. नाम्युपान्त्य इ कृ गृ ज्ञः कः ला., नाम्युपान्त्य प्री कृ शृ ज्ञः कः पा. । २. करोति पा. । ३. "तत्र....कानौ" (सि.हे.सू. ५-२-२) । ४. "द्विर्धातुः०" सि.हे.सू. (४-१-१) ५. ञ् पा. । ६. ञि पा. । ७. ०षङि पा. । ८. वर्तमानायामित्यर्थः । ९. अत्र सर्वत्र । १०. अनुबन्धमात्र० पा. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


अथ प्रस्तुतस्तुतिमाह–

**पुष्पन्धयीमिव स्थितिकरीं तवानन्दथुप्रदेऽङ्घ्रिकजे ।**
**यः स्वाकृत्रिमभक्तिं चकार तमभक्त भजका श्रीः ॥५॥**

**यः** कश्चित्तवानन्दथुप्रदे समृद्धिप्रदायिनि **अंह्रिकजे** पादपद्मे **पुष्पन्धयीमिव** सौरभलोभोपनतभृङ्गीमिव निजसम्यग्भक्तिं **[स्थितिकरीं]** स्थितिकरणेशीलां चकार तं नरं भजतादित्यशास्यमाना **भजका श्रीर्लक्ष्मीरभक्ताशिश्रियदिति ।** अत्र श्रियाः श्रयणेन श्रीमत्त्वादिपद्मसादृश्यं भगवदंह्रिकजे निश्चीयते अत एवं भृङ्ग्युपमानं युक्तिमत् इति ।

अत्रोदाहरणानि—'**टः**' 'अणञेयेकण्नञ्स्नञ्टिताम्' (सि.हे.सू.२–४–२०) इत्यनेन ङ्यर्थः । टुस्तु "ट्विवतोऽथुः" (सि.हे.सू. ५–३–८३) इत्यथुप्रत्ययार्थो यथा–पुष्पं धयतीति । "शुनीस्तनमुञ्जकुलास्यपुष्पात् ट्धेः" (सि.हे.सू.५–१–११९) इति खशि मागमे धातोष्टित्त्वात् ङ्यां **पुष्पन्धयीमिति**। स्थितिं करोतीति "हेतुतच्छीलानुकूले...." (सि.हे.सू. ५–१–१०३) इत्यादिना टे गुणे टित्त्वाच्च ङ्यां स्थितिकरीति । तथा आङ्पूर्वः "टुनदु समृद्धौ" (है.बृ.प्र.पृ.५०४) नद् भावे अथौ **आनन्दथुरिति ।**

डः "डित्यन्त्यस्वरादेः" (सि.हे.सू. २–१–११४) इत्यनेनान्त्यस्वरलोपार्थः, डुस्तु "ड्वितस्त्रिमक् तत्कृतम्" (सि.हे.सू. ५-३-८४) इत्यनेन त्रिमगर्थो यथा–आनन्दथुं प्रददातीति "प्राज्ज्ञश्च" (सि.हे.सू.५–१–७९) इति डे कं जलं तस्मात् जातं "अजातेः पञ्चम्याः" (सि.हे.सू. ५-१–१७०) इति डे अन्त्यस्वरलोपा**दानन्दथुप्रदे कजे** चेति । तथा करणेन निवृत्ते तमि(ति) त्रिमकि नञि **चाकृत्रिमेति ।**

**णस्तु** वृद्ध्यर्थो यथा–"डुकृङ् करणे" (है.बृ.प्र.पृ.५२२) कृ परोक्षाणवि णित्त्वाद् वृद्धौ द्वित्वादौ **चकार** इति ।

**नस्तु** "इच्चापुंसोनित्क्याप्परे" (सि.हे.सू. २–४–१०७) इत्यनेन इदभावार्थो यथा **भजतादिति** "आशिष्यकन्" (सि.हे.सू. ५–१–७०) इत्यकनि स्त्रियां नित्त्वादिदभावे **भजकेति** ॥५॥

---

१. तच्छीलां । २. ०वात्र । ३. "परोक्षे" (सि.हे.सू. ५–२–१२) । ४. "द्विर्धातुः परोक्षाङे प्राः्तु स्वरे स्वरविधेः" (सि.हे.सू. ४-१-१) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ विरतस्यापि भगवतः क्रियामात्रस्तुतेर्भोगादिफलमाह—

**योऽकृत्यकृत् कान्तपाशदास्या स्वं संप्रयच्छते ।**
**सोऽपि चेत्पटुजातीयमुत्तया स्तौति ते क्रियाम् ॥६॥**

**चन्द्रावदातवदना निर्जरलीलावती तमाश्लिष्येत् ।**
**भवदीयशरणगां मां स्मरार्दितामव वदन्तीति ॥७॥ युग्मम् ॥**

यः कश्चिदकार्यकारी निन्द्या कान्ता **कान्तपाशा**, सा चासौ दासी च तया सम्प्रदानभूतया **स्वं** द्रव्यं रागातिरेकादहं त्वद्वशगोऽस्मीत्यात्मानं वा **संप्रयच्छते** दत्ते । **सोऽप्येवं**विधाकार्यकार्यपि पट्वी प्रकारोऽस्याः सा **पटुजातीया** सा चासौ मुच्च तस्या भावो, मुत्ता तया । चेद्यदि कासौ मूलोन्मूलितमारविकारः क चाहं नराधमः स्मरवशगत्वेन दास्याः कामुक इत्येवं स्वकर्म निन्दन् ते तव क्रियां स्तौति प्रशंसयति ॥६॥

तर्हि तं नरमिन्दूज्ज्वलमुखी देवाङ्गना जरारहितान्यस्त्री वा त्वदीय[3]शरणप्राप्तां मदनातुरां मा[4]मव रक्षेति वदन्ती आश्लिष्येत्[5] आलिङ्गेदित्यर्थः ।

अथोदाहरणानि—**पकारो** "ह्रस्वस्य तः पित्कृति" (सि.हे.सू.४—४—११३) इति तागमार्थः । "क्यङ्मानि पित्तद्धिते" (सि.हे.सू. ३—२—५०) इत्यनेन पुंवद्भावार्थश्च यथा—न क्रियत इति "कृवृषि........" इति (सि.हे.सू. ५-१-४२) इति सू[6]त्रेण क्यपि नञो नकारस्याँत्वे अकृत्यं तत्करोति इति क्विपि तल्लुकि पित्त्वादुभयत्र तागमेऽ**कृत्यकृ*त्**[7] इति । तथा निन्द्या कान्ता *"निन्द्ये पाशप् (पि)" (सि.हे.सू.७—३—४) पि*त्त्वात्पुंवद्भावे **कान्त*पाशे**ति ।

मस्तु "दामः[1] सम्प्रदानेऽधर्म्ये आत्मने च[1]" (सि.हे.सू. २-२-५२) इत्यत्र विशेषणार्थः । यथा संप्राभ्यां 'दाम् दाने' (है.बृ.प्र.पृ. ४९०) दा वर्तमाना ते शवि "श्रौति...." (सि.हे.सू. ४—२—१०८) इत्यादिना यच्छादेशे सम्प्रदाने तृतीयायां **दास्या स्वं सम्प्रयच्छते** इति ।

१. "दामः सम्प्रदानेऽधर्म्ये आत्मने च" (सि.हे.सू. २—२—५२) इति तृतीया ।
२. अयं पाठः पा. प्रतिस्थः । ला. प्रतौ तु 'सा पटुजातीयमुत्ता तया' इत्येवमस्ति ।
३. •यं. ला. । ४. यमव. ला. । ५. आलिलिङ्गतमामचिरादेवाश्लिक्षतीत्यर्थः पा. ।
६. नास्ति पा. । ७. "नञत्" (सि.हे.सू. ३—२—१२५) । ८. '* *' एतच्चिह्नान्तर्वर्त्तिपाठो नष्टः ला.प्रतौ । एवं ९-१०-११ अङ्केषु अपि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


रस्तु "रिति" (सि.हे.सू. ३–२–५८) इति सूत्रेण पुंवद्भावार्थो यथा पट्वी प्रकारो अस्याः 'प्रकारे जातीयर्' (रि) (सि.हे.सू. ७–२–७५) पुंवद्भावे च पटुजातीय इति ।

लस्तु "तिलैस्तुलिन्" मिन्न्यनि ण्येणि स्त्र्युक्ताः" (है. लि. स्त्री. अ. का. ६) इत्यनेन स्त्रीलिङ्गार्थो यथा मुदो 'भावे त्वतल्' (सि.हे.सू. ७–१–५५) इति तलि लित्वाद् "आत्" (सि.हे.सू. २–४–१८) इति सूत्रेणाऽऽपि टादौ च मुत्तयेति ।

वः 'उत औविंति व्यञ्जनेऽद्वेः' (सि.हे.सू.४-३-५९) इत्यादौ 'अवौ दा....' (सि.हे.सू. ३-३-१) इत्यादौ च विशेषणार्थो यथा 'ष्टुंग्क् स्तुतौ' (है.बृ.प्र.पृ. ५४६) ष्टु तस्य स्तु वर्तमाना तिवि वित्वाद् गुणे औत्वे च स्तौति इति, तथा अव पूर्वो '³दैंव् शोधने' (है बृ.प्र.पृ.४९५) दै 'आत्सन्ध्यक्षरस्य' (सि.हे.सू.४-२-१) इति 'दा' क्ते वित्वाद्दासंज्ञाभावे दतोऽभावादवदातेति ।

शः 'क्यः शिति' (सि.हे.सू.३-४-७०) इत्यादौ विशेषणार्थो यथा–क्रियते इति, 'कृगः श च् (च) वा' (सि.हे.सू.५-३-१००) शचि (शे) शित्वात् क्ये[4] 'रिः शक्याशीर्ये' (सि.हे.सू. ४-३-११०) इति रित्वे आबादौ च क्रियामिति ।

षः 'षितोऽङ्' (सि.हे.सू.५–३–१०७) इत्यनेनाङर्थो यथा, 'जृष् झृषच् जरसि' (है.बृ. प्र.पृ. ५५१) जॄ षित्वादङि "ऋवर्णदृशोऽङि' (सि.हे.सू. ४–३–७) इति गुणे निर्योगान्निर्जरेति ।

सस्तु "नाम सिदय्व्यञ्जने' (सि. हे.सू.१–१–२१) इत्यनेन पदत्वार्थो यथा–भवत इदं इति ईयसि सित्वात्पदत्वे भवदीयेति ।

आकारः क्वचित भ्वाद्युपलक्षणार्थो[5] यथा–'अव रक्षणे' (है.बृ. प्र. पृ. ५१०] अव् पञ्चम्या हौ भ्वादित्वात् शवि हेर्लुकि अव इति । तथा "वद व्यक्तायां वाचि" (है. बृ. प्र. पृ. ५३१) वद् शतरि भ्वादित्वात् शवि "श्यशवः" (सि. हे. सू. २–१–११६) इति शवः परस्यातुरन्तादेशे वदन्ती चेति । अका-

१. "तिलस्तु" अयं पाठो नास्ति पा. । २. 'ण्यपि स्त्र्युक्ता' अयं पाठः ला. प्रतौ नास्ति पा. प्रतौ तु वर्तते । ३. 'दांव्कृ लवने' (है.बृ.प्र.पृ ५३४) इति पाठः पा. । ४. "क्यः शिति" (सि.हे.सू. ३–४–७०) इति सूत्रेण । ५. "अतः प्रत्ययाल्लुक्" (सि.हे.सू. ४–२–८५) इति सूत्रेण अपि इति अधिकं पा. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रस्य [1]स्वाद्युपलक्षणेऽनियतत्वादल्पफलत्वाच्च पृथगत्रैव दर्शनम् । अत एवावेति वेदन्तोति न्याय्ये आद्यनुबन्धान्विहायाशेषाणामपि शेषानुबन्धानां समाप्तिद्योतनार्थं इतिशब्दस्यान्त्योपन्यासः । तेनात्र ये *[2]छंजझा ठढ थदध फबभाः तथा अन्त्यविसर्गौ च अ*नुबन्धा नोक्तास्ते न सन्तीत्यवसेयमिति ॥७॥

अथ यस्य भक्त्यादिर्यथाभिलाषमिष्टार्थफलैः पम्फुलीति स भगवानेव किमपि व्यावर्ण्यते—

**जहि जाड्यमस्य दोषान् दुनु पङ्कं क्षिप तमांसि रुन्धि शुचम् ।**
**तनु च मुदं सच्चक्रे मुषाण कुमुदं प्रथय सुपथम् ॥८॥**[3]
**इत्येव यः समुद्यंयमीति भास्वद्गुणैर्जगत्युदितः ।**
**स त्वं निजदर्शनतस्तनुतादिन ! सपदि नः सुदिनम् ॥९॥ [युग्मम्]**

**जहीत्यादि** । भास्वद्भिर्दीप्रैर्भास्वतः सूर्यस्य सम्बन्धिभिर्जाड्यापहारादिभिर्गुणैः कृत्वा जगत्युदितः सन् **जाड्यं** जडत्वं शैत्यं च **जहि** हिन्धि । **दोषान्** रागद्वेषादीन् निशां च **अस्य** क्षिप । **पङ्कं** पापं कर्दमं च **दुनु** अपतापय । **तमांसि** अज्ञानानि अन्धकाराणि च **क्षिप** नुद । तथा **सच्चक्रे** विद्वत्समूहे प्रधानकोके च **शुचं** खेदं **रुन्धि** आवृणु **मुदं** प्रीतिं **तनु** च विस्तारय । **कुमुदं** कुत्सितप्रीतिं कैरवं च **मुषाण** लुण्टय । **सुपथं** साधुमार्गं निरपायाध्वानं च **प्रथय** प्रवर्तय ॥८॥

**इत्येव** यो भगवान् **समुद्यंयमीति** भृशं पुनःपुनर्वा समुद्यच्छति **स त्वं हे इन** ! हे स्वामिन् ! पक्षे हे अर्क ! **निजदर्शनतः** स्वकीयमतात् स्वसाक्षात्कारात् वा **नो**ऽस्माकं **सपदि सुदिनं** तनुतादिति ।

अत्र **जही**त्यादिषु सर्वेषु क्रियापदेषु "प्रत्यये नवा...." (सि. है. सू. ५–४–४३) इति सूत्रेण हिः ।

अथानुबन्धाः—ककारोऽदादेरुपलक्षणार्थो यथा 'हनंक् हिंसागत्योः' । (है. बृ.प्र पृ. ५४१) हन् प्रत्ययाभावे "शाससूहनः शाध्येधिजहि" (सि.है.सू. ४–२–८४) इत्यनेन ह्यन्तस्य हनः **जही**ति ।

---

१. नास्ति ला. । २. * * एतच्चिह्नान्तर्गतपाठस्थाने पूच्छाजाद्य इति पाठः पा. प्रतौ । ३ पा. प्रतौ अस्य श्लोकस्य स्थाने एवं श्लोकोऽस्ति—

हन्ति तमोऽस्यति दोषान् दुनोति पङ्कं च डिपति जडिमानम् ।
सच्चक्रस्योग्रशुचं छिनत्ति तनुते ततश्च मुदम् ॥८॥

४. अदादित्वात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


चस्तु दिवादेर्यथा–"असूचू क्षेपणे" (है. बृ. प्र. पृ. ५५४) अस् हौ दिवादित्वात् श्ये 'अतः प्रत्ययाल्लुक्' (सि. हे. सू. ४–२-८५) इति सूत्रेण हेर्लुकि अस्येति ।

टः स्वादेर्यथा "टुदुंदू उपतापे" (है. बृ. प्र. पृ. ५५९] दु हौ स्वादित्वात् श्नौ 'असंयोगाद् ओः' (सि. हे. सू. ४–२-८६) इति हेर्लुकि दुनु इति ।

तस्तुदादेर्यथा–'क्षिपींत् प्रेरणे' (है. बृ. प्र. पृ. ५६१) क्षिप् हिः तुदादित्वात् शे हेर्लुकि क्षिपेति ।

*पेस्तु रु*धादेर्यथा–'रुधृं*पी[2] आवर*णे' (है. बृ. प्र. पृ. ५६७) रुध् हिः रुधादि*त्वात् 'रुधां स्व*रात्........' (सि.हे.सू. ३–४–८२) इति श्ने "श्नास्त्योर्लुक्" (सि. हे. सू. ४–२–९०) इति अल्लुकि ['हुधुटोहेर्धिः' (सि. हे. सू. ४–२–८३) इति हस्य धादेशे] 'धुटोधुटि....' (सि. हे.सू. १–३–४८) इति रुधो धस्य लुकि च रुन्धि इति ।

यस्तनादेर्यथा 'तनूयी विस्तारे' (है.बृ.प्र.पृ.५६९) तन् हौ तनादित्वादुप्रत्यये हेर्लुकि तनु इति ।

शः क्र्यादेर्यथा–'मुषञ् स्तेये' (है.बृ.प्र.पृ. ५७४) मुष् हौ क्र्यादित्वात् श्नाप्रत्यये 'व्यञ्जनात् श्नाहेरानः' (सि. हे. सू. ३–४–८०) इति श्नायुक्तस्य हेरानादेशे णत्वे च मुषाण इति ।

णश्चुरादेर्यथा 'प्रथण् प्रख्याने' (है. बृ. प्र. पृ. ५७६) प्रथ हौ चुरादित्वात् णिचि शवि गुणे अयिर्लु(लु)कि च प्रथय इति । यङ्लुक् (प्) वेति कि(पि)त्करणं यङ्लुबन्ताः सर्वेऽपि धातवोऽदादौ शवनर्हाः परस्मैपदिनश्चेति ज्ञापनार्थं यथा समुदभ्यां 'यमूं उपरमे' (है.बृ.प्र.पृ.५०८) यम् यङो लुपि तिवि द्वित्वादौ ईति च 'समुद्यंयमीति ॥९॥

## इत्यनुबन्धफलगर्भा श्रीगौतमस्तुतेरवचूरिः समाप्तः(प्ता) ।

॥श्रीः॥

[पॉं. प्रतौ तु दश श्लोकाः सन्ति, तत्राष्टमनवमौ भावार्थतः ला. प्रतिस्थाष्टमनवमाभ्यां तुल्यौ केवलं प्रयोगतो भिन्नौ । दशमश्लोके तु गौतमस्वामिनो भक्तिर्याचिता स्तुतिकारेण । अयम् दशमः श्लोको नास्ति ला. प्रतौ ।

---

१. * * एतच्चिह्नान्तर्वर्ती पाठो ला. प्रतौ त्रुटितः । २.–३. * * एतच्चिह्नान्तर्गतः पाठः ला. प्रतौ त्रुटितः अनुमानतः पूरितः । ४. પ્રવર્તક કાન્તિવિજયજી જૈન જ્ઞાનભંડાર. પાટણ. ડાબડા નં. २४९. प्रति नं–१२२९६ पत्र-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पा. प्रतिस्थाष्टमनवमदशमश्लोकानामवचूरिस्तु इयम्]

अथ भगवतः कांश्चिद् वाग्गुणानाह–

**हन्ति तमोऽस्यति दोषान् दुनोति पङ्कं च डिपति जडिमानम् ।**
**सच्चक्रस्योग्रशुचं छिनत्ति तनुते ततश्च मुदम् ॥८॥ आर्या ॥**

हन्तीत्यादि–स्फुरद्गुणैस्तेजस्वित्वादिभिः कृत्वा भास्वतो देदीप्यमानस्य विवस्वतो वा भवतो गवां वाचां पक्षे रुचां च विलासस्तमोऽज्ञानमन्धकारं च **हन्ति** हिनस्ति, **दोषान्** द्वेषादीन् निशां **च अस्यति** क्षिपति **पङ्कं** पापं कर्दमं च पुनर्**दुनोति** उपतापयति, **जडिमानं** जाड्यं शैत्यं च **डिपति** क्षेपयति (क्षिपति)। **सच्चक्रस्य** विद्वत्समूहस्य प्रधानकोकस्य **च उग्रशुचं** तीव्रविषादं **छिनत्ति** खण्डयति । **ततश्च** शुक्छेदनानन्तरं पुनर्**मुदं** हर्षं **तनुते** विस्मा(स्ता)रयति ॥८॥

**कुमुदं मुष्णाति पुनः पद्मोल्लासं प्रपञ्चयत्यनिशम् ।**
**राराष्टि गोविलासः स्फुरद्गुणैर्भास्वतो भवतः ॥९॥ युग्मम् ॥**

तथा **कुमुदं** कुत्सितप्रीतिं कैरवं च **मुष्णाति** लुण्टयति । **पद्माया** लक्ष्म्याः पद्मानां कमलानां **चोल्लासं** प्रपञ्चयति प्रकटयतीत्येवमग्रमनिशं निरन्तरं निशाविरामं च गोविलासो **राराष्टि** भृशं शोभते इत्यर्थः ।

अथानुबन्धाः । ककारोऽदादेरुपलक्षणार्थो यथा 'हनंक् हिंसागत्योः' वर्त० तिव् । अदादित्वात् प्रत्ययाभावे **हन्ति** इति । **च**स्तु दिवादेर्यथा 'असूच् क्षेपणे' अस् तिव्, दिवादित्वात् श्ये, **अस्यति** इति । **ट**ः स्वादेर्यथा 'टुदुंट् उपतापे' दु तिव् स्वादित्वात् श्नुः "उश्नोः" (सि.हे.सू. ४–३–२) इति गुणे **दुनोति** इति । **त**स्तु-दादेर्यथा "डिपत् क्षेपे" (है.बृ.प्र.पृ.५६६) डिप् तिव् तुदादित्वात् शे **डिपति** इति । **प**स्तु रुधादेर्यथा 'छिदंपी द्वैधीकरणे' छिद् रुधादित्वात् स्वरात् श्ने **छिनत्ति** इति । **य**स्तनादेर्यथा 'तनूयी विस्तारे' तन् । वर्तमाना ते, तनादित्वात् उः, **तनुते** इति ॥८॥

**श**ः क्र्यादेर्यथा–'मुषश् स्तेये' मुष् तिव् क्र्यादित्वात् श्ना तस्य णत्वे **मुष्णाति** इति । **ण**श्चुरादेर्यथा प्रात् 'पचुण् विस्तारे' (है.बृ.प्र.पृ. ५७४) पच् तिव् चुरादित्वात् णिचि नोन्ते शवि गुणे अयि च **प्रपञ्चयति** इति । यङ्लुक् (पृ) च्चेति कि(पि)त्करणं यङ्लुबन्ताः सर्वेऽपि धातवोऽदादौ शवा(व)नर्हाः परस्मैपदिनश्चेति ज्ञापनार्थं, यथा "राजि(जृ)ग् टुभ्राजि(जृ)ग् दीप्तौ' (है.बृ.प्र.पृ. ५२४) राज् यङो लुपि तिवि द्वित्वषत्वादौ च **राराष्टि** इति ॥९॥ ॥युग्मम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

**इत्यभिनुत्य भवन्तं जगदुत्तम ! गौतम ! प्रशमवन्तम् ।**
**याचे न किञ्चिदपरं भूयात् त्वयि भक्तिरेव परम् ॥१०॥**

इत्यनुबन्धफलेन [युक्ता] श्रीगौतमस्वामिस्तुतिः सम्पूर्णा ॥

देवतानां गुरूणां च नाम नोपपदं विना उच्चरेदित्यादिवचनात् **हे जगदुत्तम ! गौतम !** युगप्रधानेन्द्रभूते ! गौतमेत्यत्र गौतमगोत्रभवत्वेनेन्द्रभूत्यग्निभूतिवायुभूतीनां सामान्यनिर्देशेऽपि **श्रीवर्धमानशिष्याग्रणीरित्यनेनेन्द्रभूतिरेव** गृह्यते । मुख्यगणधरत्वेन तस्यै(स्य) शिष्याग्रणीत्वोपपत्तेः इति प्रागुक्तप्रकारेण **भवन्तं प्रशमवन्तमुपशमरसोपेतम् अभिनुत्य** स्तुत्वा **किञ्चिदपरं** श्रीयशऋद्धिस्वर्गादिकं **न याचे** नाभ्यर्थये **परं** केवलं **त्वयि** भवद्विषये सर्वोपेयार्थसाधनी **भक्तिरेव भूयात्** सम्पद्यताम् इति ।

इत्यनुबन्धफलगर्भा श्रीगौतमस्तवावचूरिः ।

---

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# सिद्धिसूरिकृत पाटण-चैत्य-परिपाटी (सं. १५७६)

संपादक—भोगीलाल ज. सांडेसरा

मध्य कालमां रचायेलुं ऐतिहासिक जैन गुजराती साहित्य भाषा अने साहित्यना विकासनी दृष्टिए तो अगत्यनुं छे, परन्तु ए साहित्य मात्र जैन समाजनी ज नहि, पण तत्कालीन गुजरातनी धार्मिक–सामाजिक स्थिति उपर अनेकविध प्रकाश पाडे छे. व्यक्तिगत आचार्यो के गुरुओ विषे विस्तृत रासाओ उपरांत नानकडां स्तवनो के फागुओ रचायेलां छे. जैन तीर्थोनुं वर्णन करती के एनो वृत्तान्त आलेखती अनेक नानी मोटी कृतिओ मळे छे. जूनी तीर्थमालाओ के चैत्यपरिपाटीओना केटलाक संग्रहो प्रगट थया छे. केटलांक विशिष्ट नगरोनी चैत्यपरिपाटीओ ते ते नगरोना स्थानिक इतिहास माटे पण कामनी छे.

गुजरातनी ऐतिहासिक पाटनगरी पाटण विषे एक करतां वधु चैत्यपरिपाटीओ मळे छे ते, ए महानगरनां स्थळनामोनो अने स्थानिक वसतीमां धार्मिक-सांप्रदायिक फेरफारोनो अभ्यास करवा माटे उपयोगी छे. सं. १६४८ (ई. स. १५९२)मां ललितप्रभसूरिए अने सं. १७२९ (ई. स. १६७३)मां हर्षविजये रचेली 'पाटण-चैत्य-परिपाटी'नुं संपादन मुनि श्री कल्याणविजयजीए कर्युं छे (प्रकाशक–श्री हंसविजयजी जैन लायब्रेरी, अमदावाद, सं. १९८२). सं.१८२१ (ई. स. १७६५)मां उपाध्याय ज्ञानसागरजीए 'तीर्थमाला स्तवन' रच्युं छे, तेमां पाटणनी चैत्यपरिपाटीनो पण समावेश थाय छे (जुओ 'जैन सत्य प्रकाश,' वर्ष ८, अङ्क १२, सप्टेम्बर १९४३). आ मुद्रित चैत्यपरिपाटीओ उपरांत सं. १६१३ (ई. स. १५५७)मां १९३ कडीमां रचायेली, सिंघराजकृत 'पाटण-चैत्य-परिपाटी'नी हस्तप्रत अमदावादमां पगथियाना उपाश्रयना भंडारमां छे.

पाटणनी उपलब्ध चैत्यपरिपाटीओमां सौथी जूनी, सिद्धिसूरिकृत 'पाटण-चैत्य-परिपाटी' पण अप्रगट हती, जे अहीं प्रसिद्ध करवानी तक लउं छुं. सद्‌गत पंन्यास श्री रमणिकविजयजी महाराज पासे जोयेली चार पत्रनी हस्तलिखित प्रत उपरथी एनी नकल सने १९५०मां जेसलमेर खाते में करी लीधी हती. हस्तप्रतमां लेखनसंवत नथी, पण लिपि उपरथी विक्रमना सोळमा सैकाना अंतमां के सत्तरमा सैकाना प्रारंभमां एनी नकल थई जणाय छे. रचनावर्ष परत्वे कृतिने अन्ते—

'छिहुत्तरइ वरसइ, मनह हरिसइ सिद्धसूरिंदइ कही' ए उल्लेखमां 'छिहुत्तरइ' अर्थात् छोंतेर ए, कृतिनुं भाषास्वरूप जोतां, सं. १५७६ संभवे छे.[1] एटले के सिद्धिसूरिकृत 'पाटण-चैत्य-परिपाटी' ई. स. १५२०मां रचायेली गणाय. सं. १६१६ (ई. स. १५६०) मां 'सिंहासन-बत्रीसी' रचनार सिद्धिसूरि[2] आ चैत्यपरिपाटी रचनार सिद्धिसूरिथी अभिन्न हशे के केम ए निश्चितपणे कहेवुं शक्य नथी. 'पाटण-चैत्य-परिपाटी' ए जो सिद्धिसूरिनी प्रारं-

१. चतुर्भुजकृत 'भ्रमरगीता'ने अन्ते 'छिहुतरि कीधु छूटवा भेटवा श्री भगवान' ए उल्लेखमां 'छिहुतरि'ने सं. १५७६ गणवामां आव्यो छे ए सरखावो. ('प्राचीन फागु-संग्रह', काव्यांक–१९).

२. 'जैन गुर्जर कविओ', भाग १, पृ. २०६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिक कृति होय तो चालीस वर्ष बाद तेओ 'सिंहासन-बत्रीसी' जेवी रचना करे ए संभवित छे.

एक हस्तप्रत उपरथी संपादन कर्युं होई मूल हस्तप्रतनो पाठ यथावत् अहीं आप्यो छे. एमां महोल्लानां नाम काळां बीबांमां छाप्यां छे. उपर्युक्त सर्व चैत्य परिपाटीओ, स्थानिक जूना दस्तावेजो, हस्तप्रतोनी पुष्पिकाओ, पट्टावलिओ आदिने आधारे पाटण तेमज गुजरातनां अन्य नगरोनां स्थळनामो विषे विस्तृत अध्ययन करवाने अवकाश छे. लंडन आदि पश्चिमनां महानगरो विषे आवां आधारभूत अध्ययन थयेलां छे.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धिसूरिकृत

## पाटण-चैत्य-परिपाटी

नियं गुरु पय पणमेवि, सरसति सामिणि मनि धरीय,
होयडइ हरष धरेवि, गोयम गणहर अणुसरिय,
पभणिसु चेतप्रवाडि अणहिलपुर पट्टण तणीय,
मुझ मनि षरीय रहाडि, दिउ मति निरमल अतिघणीय. १
देश शरोमणि देश, गुज्जरधर जगि जाणीयए,
वावि सरोवर कूव वणसइ विविह वखाणीयए,
नयनानंद सुचंग नरसमुद्र पट्टणनगर,
गढ मढ पोलि उतंग, जसु सम महियलि नवि अवर. २
धर्मवंत बहु लोइ निवसइ जत्थ दयासहित,
उवयारी सहु कोई, विनय विवेक गुणे भरित,
दान पुण्यनी वात करइ जिहां अति....रडीय,
पुण्य पुरष विख्यात वसइ ति ऊंची सेरडीय. ३
मनि धरि अविचल भाव, तिहां प्रणमडुं जिण सोलमउ ए,
त्रिभुवन केरु राउ, भवीयां भगतिइं नितु नमउ ए,
अष्ट करम दल भंजि शवरमणी सयवर वरिउ ए,
मोह मयण मद गंजि उपशमरस जिणि आदर्यउ ए. ४
दीठइ परमाणंद, अंगिहिं अतिघण ऊपजए,
वंदिसु पूजिसु चंग, भवभयथी नवि धूजीयए,
संतिकरण जगदेव, सेवा सारइं इन्द्र सवे,
मुनिवर तूं महादेव, दइ दरिसण मुझ भवह भवे. ५

वस्त

संति जिणवर संति जिणवर भावि वंदेवि,
शक्रस्तव थुति तवन भणि, दूरि करवि आसायण निरत्तिहिं,
भवसय संचिय पाप सवि, टालइ सूधइ ध्यानि,
ऊंची सेरी वलि सुपरि भेटया श्रीवर्धमान. ६

हिव भास

हिव साऊकइ पणमिसु पासो, समरथ स्वामी लीलविलासो, दीठइ मनि उल्हासो,
त्रेवीसम जिण पावविहंडण, दुष्ट महारिपु दूरि विहंडन, मंडन सुक्खनिवासो. ७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगर कपूर अनइ कस्तूरी, पूजइ चंदनि केसर चूरी,
पूरी मन आणंद,
अतिहि मनोहर जसु प्रासाद, गावइं गायण जिण जसवाद,
सुणियइ नव नव नाद. ८
इणि परि उत्सव उत्तिम करता, सुपरि सुपुण्य भंडार सुभरता,
सरता भेटयउ नेमि,
महूकर मनह मनोरथ पूरइ, पास पंचासरइ भाव विचूरइ,
सार संसारइ छेमि. ९
चम्मह भुवनि संति जिण गरुउ, जाइ सेवंती दमणउ मरुउ,
पूजउ मन उल्हासे,
वासपूज्य वंदउ बहु भावइं, जसु डरता भय मूलि न आवई,
रहइ नित अषय निवासे. १०
सिरि देसलहर तणइ प्रसादइं, भेटिसु पास मनह अवसादइं,
पूरइ प्रत्यासार,
पलीवालउ श्रीआदिजिणेसर, आँबिलीउ स्वामी नेमीसर,
नागभद्रि नमि सुविहार. ११
शांतिनाथ बोकडीयां भुवणइं, थाइसु निरमल अरिहंत थुणणइं,
गुण गाइसु सुविचार,
महावीर भवभावठि भंजइ, भावहडउ त्रिभुवन मन रंजइ,
पीपलइ प्रत्यासार. १२
कोरटवालइ शांतिजिणंदो, चिंतामणि आपइ आणंदो,
चिंतामणि पास जिणंदो,
वासपूज्य पूजउ मन भावइं जिन सुषसंपद निज घरि आवइं,
परा कोटडी सुहावइ. १३
अष्टापदि चंद्रप्रभ देव, नरे नरपति बहु सारइं सेव,
ऊपनउ ऊलट हेव,
अष्ट करम चूरइ अट्ठम जिण, दीठउ नयणे धन्न ति अम्ह दिन,
जगबंधव जगदेव. १४
वाजइं मद्दल अतिहिं रसाल, तिवली ताल अनइ कंसाल,
गावइं अपछर बाल,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरत्ती मंगले उझमाल, चरचइं चंदनि गुणे विसाल,
प्रभुतनु अति सुकमाल. १५

वस्त

एम सुपरइं एम सुपरइं नमी जिणराइ,
चंद्रप्रभ चंदन समउ, भवह पाप संतापहारण,
त्रिकरण सुद्धें जे नमइं ताह एह आनंदकारण,
**षरतर पीपलियां भवनि** पणमिउ स्वामी संति,
**त्रांगडीयावाडा** भणी जिण भेटण मुझ षंति. १६

भास

पदमप्रभ छट्ठउ नमउं ए, परिहरि मनह प्रमाद त,
कुगति कुमति दूरइं गमउ ए, सुणियइ घंटह नाद त,
**चणहटडी** संतीसर ए सिरि सोलमउ जिणंद त,
दरसणि दोषम बहु हरए, निज कुल केरउ चंद त. १७
**भाणसोल्यां**[1] षरतर तणउ ए, सिरि संतीसर सामि,
**पटूआवाडइ**[2] जिण नमिउ ए, जाइं पाप सुनामि त,
**सगर कूइ** संपइ करए, पास प्रगट अवतार त,
बीजइ भवनि सुकृत भरए, **कंसारवाडइ** गुणसार त. १८
**साहवाडइ** मुनि सुव्रत ए, वीसमउ पूरइ आस त,
अंगिहिं धरी महाव्रत ए, जिणि कीउ सिद्धिहि वास त,
**बाबरकोटिहिं** नमिसु जिण, पास गुणे सुविशाल त,
**नारिंगपुरि** वंछी करण, चरचिसु कुसमह माल त. १९
**जोगीवाडइ** जागता ए, पास अनइ महावीर त,
वंछीय जन सुख आपता ए, समरथ साहसधीर त,
**जलचउकइ**ं जगि जाणीयइ ए, मल्लिनाथ जसवंत,
जीरावलउ वषाणीयए, जिणि नामइं हुइ संति. २०
**रातकावाडइ** रतननिधि, पास जिणेसर दिट्ठ त,
**पाल्हणपुरवाडइ** नमउं ए, जसु दरसण गुण इट्ठ त,

---

१. आ स्थान हाल निश्चित थई शकतुं नथी.

२. पाटणना बजारमां चीतारानी खडकी पासे अगाउ पटवावाडो हतो एम सद्‌गत आचार्य विजयमेघसूरिजीए वातवातमां कह्युं हतुं.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरमवाडइ वंदिसुं ए, जिनवर गुणि अभिराम त,
फोफलियावाडइ निरषिसुं, जाइं पातक नामि त. २१
त्रिहुं भुवने भावठिहरण, गुणगण महि विख्यात त,
मदनमलण वंछितकरण, जसु अधिका अवदात त. २२
खिवंदणीकवाडवाडइ भणउ ए, धर्म्म पयासणहार त,
लहुडपणा लगि गुणनिलउ ए, निजकुलतणउ सिंगार त. २३
भीमषड्डि भणसिउं भल ए, भाभउ पारसनाथ त,
कमठमाण जीणइं मल्यु ए, मुगतिपुरीनउ साथ त,
कुमरपणइ नवकार कही, थापिउ जिणि धरणिंद त,
दीष लेई उपसग्ग सही पहुतउ सिद्धि जिणंद त. २४
मन आणंदइ आपणइ ए, आलस अंगि निवारि त,
पाडइ साह करणा तणइ ए, सीतलनाथ जुहारि त,
अति मूरति रलीयामणी ए, हरष न हीयडइ माइ त,
सामलइ दीठइ रति घणी ए, षेतल वसही थाइ त. २५

वस्त

पास जिणवर पास जिणवर नयणि मइं दिट्ठु,
किरि जाणे सुरतरु फलिउ, कामवेलि मइं वेगि पामीय,
भुवन विचित्र सोहामणउ, नमिउ भावि मइं सीस नामीय,
आससेण रायह कुमर, वम्मादेवि मल्हार,
जसु महिमा जागइ जगति, वंश इस्वाग सिंगार. २६

भाषा

भावन भावइं चंगी, बासी अति नवरंगी,
चामर ढालइं पाखलि, नाचइं छंदिहिं आगली. २७
वाजइं वाजित्र सार, गावइं गुण सुविचार,
इक नर चरचइं चंदनि, इक नर साचवइं मज्जन. २८
इम लेई फूलह माल, करइं इक दीप झमाल,
इक फूल ढोवइं आगलि, इक डहइं धूप अनग्गल. २९

३. सन्दर्भ उपरथी आ स्थान हालनो भाभानो पाडो संभवे छे.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चावलि चउक:पूरावइं, नेवज वेगि अणावइं,
ढोवइं जल पुणि आणी, निज निज भाविहि जाणी. २०
घणी विधि निरषीय पूय, शांति मेटण सज हूअ,
**सुरहीयावाडइ** सुहाणउ, करमहणण सपराणउ. २१
बीजइ भुवणइं पास, नमिसुं धरि उल्लास,
**कटकीयावाडइ** कउतिग, मूरति दीठो ए झिगमिग. ३२
कंबोयु पास जिणंद, नव नव करइ आणंद,
**धवली पर्व** सुधन्न, भेटिसु गुणिहि संपुन्न. ३३
जिणवर सारइ काज, सफल जनम मुझ आज,
**ढंढेरवाडइ** पूनमीया, वीर जिणेसर नमिया. ३४
**कोकावाडइ** पास, नव नव पूरइ आस,
**खेत्रपालवाडइ** दीठा, लोचनि अमोय पइट्ठा,
टालइ सगलाइ दुक्ख, आपइ शवपद सुक्ख,
**षारी वावि** सुहाणी, संभलु बोलउ वाणी,
वीर जिणेसर सार, पामिउ भवनउ पार. ३५
सोवनवरण सोहावउ, भवियण नित मणि ध्यावउ,
सतकर जसु छइ देह, करमनिवारण एह. ३६

वस्त

वीर वंदी वीर वंदी चरम जिणराइ,
जसु मानइं सुरराइ सवि, नर नरिंद बहु सेव सारइं,
धम्मपयासण दयापर, कुगइ कुमइ मिच्छित्त वारइ,
तत्त्व त्रिणि पयास कर, गुण गाव्या संखेवि,
नमिसु देव मनि भाव धरि, **सालवीवाडइ** हेव. ३७

भास

**त्रिसेरीइ** त्रिभुवनकउ राउ, नमिसु नेमि मनि धरि बहु भाउ,
यादववंशविभूषण सामि, जसु आगलि बल छंडिउ कामि. ३८
कामवेलि सरिसी कामिनी, नवयौवन गजगतिगामिनी,
चंद्रवदनि रतिरूप समान, कमलनयन तन चंपकवानि,
छंडि राजमति नेह निवारि, देइ दान पहुतउ गिरनारि,
रैवतकाचलि सदा सोहंति, दीठउ स्वामो मन मोहंति. ३९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बीजइ भुवनि जिणेसर नमी, कुमति कदाग्रह सदा अवगमी,
कल्हरवाडइ पणमउं देव, छंडि पाप निर्मल थिउ हेव. ४०
दिनाकरवाडइ देव जुगादि, त्रोडइ कीधा कर्म्म अनादि,
आदि करण नइ समरथ धीर, धांधलवाडइ पणमिसु धीर. ४१
सत्रागवाडइ रिसहेसर सामि, करउं वीनती हिव शर नामि,
पूनावाडइ परगट मल्ल, होयातणा जिणि टाल्या सल्य. ४२
आदि जिणंद नमउं कर जोडि, जेहनइ नामि न आवइ षोडि,
हिव आवी पणमिसु गोलवाडि, सगला काज सिराडइ चाडि. ४३
मूलनायक सवि सुषनउ साथ, पार्खलि वंदउं पारसनाथ,
कर्म्म चिंतामणि चिंता हरइ, पापपंक सवि दूरइं करइ. ४४
पीतलिनउ दीसइ रूयडउ, भाग्यविशाल गुणे गरूयडउ,
भगति करइं तिहां श्रावक भला, दयावंत दीसइ गुणनीला. ४५
नवइ घरि निरषउं नयणे वली, दीठइ दरसणि पूजइं रली,
जइ ए मूरति ताहरी मिली, दूरइं नाठा जाइं अली. ४६

वस्त

एम निरष्या एम निरष्या सयॅल प्रासाद,
अति सचित्र सोहामणा सुरविमाण समवडइं सोहइं,
चंद्रोवा पहिरावणी करि अपुव्व तोरणे मोहइं,
नव नव कविलाई सहित भेटचा श्रीजिनराइ,
घर देवाला मोटका भेटण ऊलट थाइ. ४७

(भास)

पारिषि वंश विभूषण, सा भमरोली, देवालउ अतिचंग त,
नमतां नावइ दूषण सा भम०, नव नव थाइ रंग त. ४८
कोरणी करि अतिरूयडउ, सा भम०, भमरी दंतह सार त,
दीवइ सोहइ सूयडउ, सा भम०, मोहइं मन मोती हार त. ४९
झूमणां झांझा बोलीइ, सा भम०, घंटह तणा निनाद त,
अमर विमाण किअ हिणवउ, सा भम०, दीठइ अमृत सवाद त. ५०
धन विजउ पारषि, सा भम०, जेणि कराव्यु एह,
नमि आणंदइं आपणइ, सा भम०, निरषि शवनउ गेह. ५१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीठउ अति रलीयामणउ, सा भम०, स्वामी अति धन धन्न त,
नमिउ जिणेसर मन सुद्धइं, सा भम०, **नरसिंह** नरह रतन्न. ५२
**तसु घरि** प्रतिमा रूयडी, सा भम०, अलवेसर दातार त,
**भणसाली महिपति घरहिं**, सा भम०, नमिउ जिणेसर सार त. ५३
अतिहिं अपूरव दीसतउ, सा भम०, सकल जिणेसर सामि त,
**ठाकुरसी घरि** सुष करइतउ, सा भम०, दीठउ अतिहिं रसाळ त,
**धापूनइ घरि** ध्याविस्यउं, सा भम०, पास गुणे सुविशाल त. ५४
बे कर जोडी वीनवउं, सा भम०, भरि सुकृत भंडार त,
देवदया परगुण निधि, सा भम०, स्वामी तूं दातार त. ५५
तइं तूठइ सुष संपजइ, सा भम०, तइं तूठइ नवि रोग,
महियलि जस नित विस्तरइ, सा भम०, पामइ सयल संयोग. ५६
**वाडी दउलतिपुरि** सही, सा भम०, भवियण सारइं सेव,
**वडली, वावडी, कउंणगिरइं** सा भम०, नमसिउं सीस नमेवि. ५७
**कतउपुरि** पणमउं सदा, सा भम०, **सगलीपुरि** जिणचंद त,
इण परि चेत्रपवाडि करी, सा भम०, भेटचा संति जिणंद त. ५८
शरणाइतउ समरथ, सा भम०, तुझ नमइं इंद नरिंद त,
चउविह संघह कारणि, सा भम०, दिनि दिन दिउ आणंद त. ५९
पट्टणि प्रसिद्धी, हरषि किद्धी, चेतप्रवाडि सुहामणी,
भणतां गुणतां श्रवणि सुणतां, अतिहिं छइ रळीयामणी,
पभण्या जि केइ नमउं, तइ अवर जे छइं ते सही,
**छिहुत्तरइ वरसइ,** मनइ हरिसइ **सिद्धसूरिंदइं** कही. ६०

**इति श्रीपत्तन-चेत्र-प्रवाडि समाप्ता ॥**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

## अज्ञातकविकृतम्

# जैनविहारशतकम्

### सं. नगीन जी. शाह

In the pages that follow a small work entitled Jainavihāraśataka has been edited on the basis of the ms. belonging to the Muni Punyavijaya Collection preserved in the L. D. Institute of Indology, Ahmedabad. The ms. bears the serial No. 4969. Its size is 26 cms. x 11 cms. It has five folios. Each side of the folio has 17 lines and each line has 58 letters. The script is legible. The condition of the ms. is good. It belongs to c. 1550 A. D. It does not contain the normal colophon which always occurs at the end of the ms. The name of the author is not given anywhere in the ms. Only the title of the work occurs at the end of the ms. This is the only ms. of the present work, that I have come across. The ms. seems to have been written by the author himself. In the ms. many quarters and phrases have been rejected by putting yellow paint on them—not because they are grammatically incorrect or otherwise corrupt but because more poetical and better chiselled quarters and phrases have occurred to the mind of the composer. And he has given these newly found quarters and phrases in the margin. The script of these quarters and phrases given in the margin resembles that of the usual writing of the text.

The subject-matter of this short poem is the Jaina temple in general. The poet displays his luxuriant rhetorical skill in describing it. So, the poem has become highly ornate. The poet refers to small *caityas* and says that with these *caityas* around the main temple looks like a fully blown golden lotus having a hundred petals. He mentions *candraśālā* and *raṅgaśālā* and other architectural details. His description of *śālabhañjikās* carved at the ends of *toraṇa* is very interesting. He has composed all the verses (102) in *sragdharā* metre.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

### अज्ञातकविकृतम्

# जैनविहारशतकम्

### श्री शारदायै नमः

उद्यन्माणिक्यमालाबहलतरमिलन्निर्यदङ्कूरपूर-
ध्वस्तध्वान्तप्रतानाप्रतिमविरचितानुत्तरोद्दानचैत्यम् ।
काञ्चिल्लक्ष्मीं जगाहे जलनिधिवसनाम्भोधिशायिप्रियाया-
श्चूडारत्नं महोयः शिरसि विनिहितं जह्नुनालीभुवेव (?) ॥१॥

आकाशे पारवश्यान्नलिनतनुरुहो निस्सहायावलम्बो
नित्यप्राचीप्रतीचीजलधिपुलिनभूसीमभूमभ्रमोभिः ।
अन्तःसञ्जातखेदादिव दिवसमणिः शक्नुवन्नाभिगन्तुं
कुत्रापि छद्मनाऽस्या जिनपतिवसतेः क्षोणिमालम्ब्य तस्थौ ॥२॥

ब्रध्नेन[1] स्थास्नुनेव प्रमथिततमसा येन चैत्येन नित्यं
व्यक्तिं भूमौ निशाह्नोः कथमपि न ह्वदा विन्दतां कौतुकेन ।
तल्लक्ष्मीं निर्निमेषं स्वनयनविषयीकुर्वतां कोविदानां
वृन्दं वृन्दारकाणामिव पुरि सुमनोवक्षसां भासते स्म ॥३॥

आशासारङ्गचक्षुःसमुदयसदनप्राङ्गणाध्वन्यदेश्य-
स्फूर्जज्ज्योतिर्वितानप्रकटितपरिधिभ्राजिजैनेन्द्रधाम्ना ।
उद्भिन्नैर्वैभवैः स्वैर्दशशतकिरणो येन मन्येऽभिभूतः
साम्यायाम्भोधिशय्यं परिचरति हरिं सोऽनुसायं समेत्य ॥४॥

रुद्रस्याप्युत्तमाङ्गे हठकृतवसतेर्बिभ्रतोऽपि त्रिशूलं
लक्ष्मच्छिद्रेण राज्ञः समभपि महसां राशिमादाय विभ्रः ।
प्रासादं पद्मजन्मा प्रवणमणिगणाकीर्णमेनं व्यधत्त
स्यान्नैवं चण्डरश्मेरिव हिमकिरणस्यास्य किं न प्रतापः ॥५॥

कोकानामिन्दुकान्ताप्रहरबिरहिणामश्रुभिर्व्याकुलानां
बन्धूनां याचतां स्वां वसतिमनुदिनं तत्कृपालुर्धरायाम् ।
उद्यन्माणिक्यवप्रोपधिपरिधियुगाधाय मूर्तिं द्वितीयां
विभ्रः प्रासाददम्भाद्गगनमणिरसौ निर्मिमीते स्म वासम् ॥६॥

---

१ सूर्यः ब्रध्नः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


त्वत्पादस्पर्शभाग्यैरभवमहमहो नन्दनोल्लासिलक्ष्मी-
र्विस्फूर्जद्भद्रशालो घनकनकमयः देवराजाभिगम्यः ।
शम्भो ! चैतन्यभूयं प्रवितर किमदो वक्तुकामः सुमेरु-
र्मन्ये प्राकारदम्भादररियुगगरुत्कुण्डलीभूय भेजे ॥७॥

मूर्छद्गर्जानिनादप्रबलजलभरानन्तराम्भोदमाला-
माद्यद्विद्युद्विलासैः स्फुरदुरुकिरणैः सोदरत्वं दधानः ।
रौप्यैश्चैत्यैरनुच्चैः स्फुरति परिवृतः सर्वतो यो विहारः
प्रोन्मीलत्कुन्दवृन्दैरिव परिकलितश्चम्पको जृम्भमाणः ॥८॥

निर्याताम्भोदरोधप्रसृमरकिरणप्रस्फुरत् शारदीन-
श्यामारामोपयन्तुर्विशदिमललितज्योत्स्नया स्पर्धमानैः
क्षुद्रैश्चैत्यैः परीतः कमपि नयनयोर्यस्तनोति प्रमोदं
प्रोत्फुल्लत्पुण्डरीकैरिव कनकमयः कुड्मलः शातपत्रः ॥९॥

पारावाराम्बरेयान्तरनिचितकृतस्थाप्तभूमीन्दुगेहो
नीचैःप्रस्थापितस्याशनिमणिपटलीक्लृप्तपाटस्य दम्भात् ।
उश्मः(?) संसाररङ्गाङ्गणनटनजुषां यातनाः कुर्वतीनां
सप्तानां दुर्गतीनां प्रतिघघनमनाः यः प्रहर्तुं प्रवृत्तः ॥१०॥

क्षिप्तैर्यत्पादकाधःकनकनिधिघटैरित्यमुष्मिन्ननन्ये
जाते जैनेन्द्रगेहे प्रणयतु सुजनोऽमुं परावृत्य कश्चित् ।
कुक्ष्यन्तर्लब्धलीलैरिव सुतमणिभिर्वाहिनी कान्तकाञ्ची
मन्ये तैरेव कुम्भैः समजनि भुवने पद्मगर्भेति नाम्ना ॥११॥

विस्फुर्जद्वज्रराजीं जिनपतिसदनोद्दामपादप्रपञ्चां
यस्मिन् संभाव्य भव्या इति निजमनसा तर्कमातन्वते स्म ।
सर्वासां दुर्गतीनां विदलयितुमना भूधराणामिवायं
वज्री श्रीमद्विहारः सममुदितरुषा प्राहिणोद् वज्रलेखाः ॥१२॥

भास्वत्स्वर्णाद्रिमुख्यान्निजविभवभरैः स्पर्धमानांस्त्रिलोकी
जैत्रान्निर्जित्य जिष्णुः क्षणमिह निखिलान् वीरमानी विहारः ।
पातालं पादकेनासममहिमजुषा स्वात्मना भूमिलोकं
शृङ्गैरभ्रंकषैः स्वैर्निखिलदिवमिवाक्रम्य मन्येऽधितस्थौ ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपैर्गेहेषु भेदैर्गिरिगहनगुहास्वौषधीभिर्बिलेषु
व्यालस्फूर्जन्मणीभिः शशिमिहिरकरैर्नक्तमह्नीति खिन्नम् ।
नालंभूष्णुर्निवस्तुं क्वचिदपि तमसां सङ्करः कांदिशीको
यस्मिन् मन्ये शरण्ये शरणमिव गतो नीलभित्तिच्छलेन ॥१४॥

यस्मिन् विस्मेरलीलाचलदलपटलारब्धकेलीमराली-
निस्यन्दिस्यन्दबिन्दून्मिषितकुमुदिनीगौरिमस्पर्धिधर्मा ।
रेजे सोपानपङ्क्तिः पवितुमिव विभोर्नित्यभक्त्या नभस्त
उच्चैरुच्चैस्तरङ्गीभवदमलपया जह्नुकन्योत्ततार ॥१५॥

प्रीत्या पौरन्दरीयालयपरपदवीचन्द्रशालां विशाला-
मारोढुं कामुकानां वृषभरसुभगं भावुकानां जनानाम् ।
निर्वर्ण्यागण्यनानामणिगणकलितस्फीतसोपानदम्भा-
च्चक्रे निश्रेणिकेवावनिबलिनिलयस्वर्ललामेन येन ॥१६॥

उद्वेलानन्दपाथोनिधिबहलपयःशुद्धभावावरुद्धा
यस्मिन्नभ्येत्य भक्तिं भगवति विदधत्यङ्गभाजां समूहाः ।
तेषां न स्यात् कदाचित् कुगतिगतिरिति व्याहरन् यो विहारो
रेखाश्चक्रे किमष्टोत्तरशतगणिताः स्वीयसोपानदम्भात् ॥१७॥

त्वत्पादाम्भोजभक्तिप्रणयनवशतः सर्वतस्तुङ्गभावा
धुर्यत्वं दानभाजां वसतिरपि पुनर्यावदाशावसानम् ।
लेभेऽस्माभिः पुनस्त्वं प्रणयजिनमहानन्दलीलानिवासं
जानीमो दिग्गजेन्द्रा इति गदितुमदश्चित्रदम्भाद् भजन्ते ॥१८॥

प्रासादे तोरणान्तःपरिलिखितवपुःशालभञ्जीप्रसून-
श्रेणीसन्दर्भमालाङ्कितकरकमला यत्र लीलायते स्म ।
शङ्के स्वायंवरस्रक्वलितकरतला सिद्धिशातोदरीयं
तिष्ठत्यस्मिन् वरीतुं वरमभिलषितं सञ्चरद्यज्जनेषु ॥१९॥

प्रेङ्खन्माणिक्यमालाबहलतरमिलल्लोललीलार्चिरम्भः-
स्तोमप्रक्षालितोर्वीतलमलिनतमोजालजम्बालमालः ।
प्राकारो धाम्नि शम्भोरवचनविषयवैभवं स्माऽऽबिभर्ति
स्वर्भाणोभीरुभानू रचितचय इव क्षोणिपीठेऽध्युवास ॥२०॥

१. बलिनियम् पातालम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्जेयो जैत्रभावासहचरपटलीकीलनाव्याकुलानां
निर्णश्यत्प्राणभाजामिह निजशरणीभावमभ्यागतानाम् ।
एतद्द्वेष्यानिवान्तर्दलयितुमसावीहमानो विहारः
प्राञ्चद्वज्रोपलानां निचयपरिचितं निर्मिमीते स्म दण्डम् ॥२१॥

निर्यज्ज्योतिर्जटालज्वलदनलशिखालोललीलायमानः
स्वीयप्राञ्चद्विभूषाविदलितनलिनीनायकाखर्वगर्वः ।
यस्मिन्नुद्दामरत्नप्रकरपरिचितो मण्डपो दीप्यते स्म
शङ्के सङ्केतगेहः सहमिलितुमदः कामुकैः सिद्धिलक्ष्म्याः ॥२२॥

स्फूर्जद्गर्जन्नभस्योन्नतसजलमीलन्नूतजीमूतमाला-
धिक्कारिध्वानघण्टाबधिरितभुवनो मण्डपोऽस्मिंश्चकासे ।
मन्ये स्वर्लोकभूमीतलबलिनिलयक्षीरसिन्धूद्वहायाः
उत्तालं सूत्रधार्याः कनकमणिमयी नर्तितुं रङ्गशाला ॥२३॥

अन्तर्नीलोपलश्रीस्फुरदरुणमणीश्रेणिसंदर्भगर्भा
यस्मिन् ज्योतिस्तरङ्गोभवदेमलपयश्चान्द्रभूमी बभासे ।
मन्ये मत्तालिमाला बहलतरदलल्लोललीलादलाली
शोणाम्भोजन्मपुञ्जा शिवहरिणदृशः खेलितुं केलिवापी ॥२४॥

पूर्वं निर्मथ्य सारं कनकशिखरिणा दत्तवानेष शेषं
गुप्तं यत् किञ्चिदास्ते तदपि पुनरितो विष्णुरादातुकामः ।
तद् दुःखं मे कृपालो व्यपनय निखिलं वक्तुमित्याजगाम
काप्यस्मिन् दुग्धपाथोनिधिरिव विधुरः स्फाटिकोर्वीमिषेण ॥२५॥

प्रासादे कुम्भ-भद्रासन-शफरयुगाऽऽदर्शक-स्वस्तिकाद्यै-
रष्टाभिः सान्द्रचन्द्रोपलदलकलितैर्वस्तुभिर्भद्रकृद्भिः ।
दध्रे काचिद् विभूषा शिवपुरनिगमाध्वन्यलीलाधराणां
प्रत्यूहव्यूहबाधं सममिव जगतीजन्मनां कर्तुकामैः ॥२६॥

दुर्जेयान् पञ्चबाणप्रबलतममदाद्वैतदुष्टाष्टकर्म-
द्वेषाज्ञानानुरागासहचरनिवहान् हेलयैवाभिभूय ।
नानामाणिक्यवर्णस्फटिकसमुदयोत्तम्भितस्तम्भदम्भात्
कीर्तिस्तम्भान् जयाङ्कान् जिनगगनमणिः स्थापयामास मन्ये ॥२७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलम्बा अन्धसंसृत्यवटनिपततां सर्वथा बोभवामोऽ-
धःकर्तुं शक्तिमन्तो नरकपरि[ग]तान् कुम्भिकानां समूहान् ।
क्रान्त्वा कुम्भीरधस्ताद् घनकनकमयाः स्तम्भवारा विहारे
स्फूर्जन्निर्यत्करैः स्वैर्जगति मतिमतां व्याहरन्तीति मन्ये ॥२८॥

यस्मिन्नुत्तुङ्गपीनस्तनकलशशिखाऽऽभोगभुग्नाङ्गभागाः
स्वर्णस्तम्भावनद्धा विदधति कुतुकं नेत्रयोः शालभञ्ज्यः ।
मन्ये यत् पौरनीलोत्पलदलनयनावैभवेनाभिभूता-
स्तत्साम्यं प्राप्तुकामा इव सुरललना देवदेवं भजन्ते ॥२९॥

मुक्ताप्रालम्बलम्बीकृतकरकमलाः सालभञ्जीसमूहा
लीलायन्ते जिनेन्दोर्वसतिविलिखिताः स्तम्भसम्बद्धकायाः ।
अभ्येत्यैतास्त्रिदश्यः परिभवितुमदः सन्ततीरीहमानाः
मन्ये पुर्याः पुरन्ध्रीविभवभरजिता मन्त्रमाराधयन्ति ॥३०॥

सर्वाङ्गीणानुरूपानणिमलवणिमाद्वैतवादाभिभूत-
स्वर्वामा मालिकाभिः शरदमृतकरप्रत्यनीकाननाभिः ।
जित्वा बन्दीकृताः किं जिनवृषभगृहस्तम्भलीलायितानां
व्याजात्यां चालिकानां भुजगपरिवृढप्रौढपारिप्लवाक्ष्यः ॥३१॥

यस्यां संस्पर्धमाना निजविभवभरैर्वर्णिनोवर्ण्यवर्णा-
निर्वर्ण्यानन्यचित्रीकृततनुलतिकाः पुत्रिकाणां मिषेण ।
आजग्मुः कर्तुकामा रहसि हृदि निजे तज्जयोपायमन्त्रं
शङ्के सम्भूय भूमीवलिसदनदिविस्मेरदम्भोरुहाक्ष्यः ॥३२॥

त्रैलोक्याजेयमोहत्रिपुररिपुरिपुद्वेषविद्वेषभाजां
संप्रापय्यातिदृप्तानिह जगति यशःशेषभूयं समूहान
प्रासादे सालभञ्जीकरकमलचलच्चामरच्छत्रराजी
व्याजात् तद्राजचिह्नान्ययमिव भगवानग्रहीदाग्रहेण ॥३३॥

काश्चिच्चङ्गेरिकाभिर्विलिखितवपुषो व्यग्रहस्ता विहारे
पाञ्चाल्यस्त्वत्पदाम्भोरुहपरिचरणात् स्वर्गवासं प्रपन्नाः ।
आप्तेन्दो ! देहि बद्धाञ्जलय इव महानन्दसौख्यश्रियं नो
जानीमो वक्तुकामा इति विबुधवशाः स्वर्गलोकादुपेयुः ॥३४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहालस्योन्मदिष्णुप्रतिभटपटलैस्ताड्यमाना प्रचण्डै-
र्दण्डाघातैरखण्डैर्विषयसुखमयैः काप्यशक्ता निवस्तुम् ।
यस्मिंश्चित्रीकृतोर्वीतलबलिनिल[य]स्वस्त्रयाणां मिषेण
प्रासादस्यावनीन्दोरिव शरणमगात् कान्दिशीका त्रिलोकी ॥३५॥

श्यामत्वाश्लिष्टमास्यं वपुरपि सविषं दुर्दिनं कारिता च
शून्याकाशे निवासो जगति मदयशो देव ! निर्णाशमेति ।
अन्तःसम्बद्धशोणोपलदलविलसन्नीलभित्तिच्छलेना-
श्लिष्यद्विद्युत्कलत्रो गदितुमिति घनः शीलयामास शम्भुम् ॥३६॥

कुर्वाणा स्पर्धिभावं सहमहिमविभावैभवैः स्वैरसह्यैः
स्वर्णाद्रिश्वेतरोचिर्दिवसमणिमुखा नैष जैत्राङ्ककारान् ।
श्रीमज्जैनो विहारः परिभवपदवीं तान्निनीषुर्विशेषा-
न्मन्ये सैन्यं ससज्ज क्वचन विलिखिताऽनीकिनोकैतवेन ॥३७॥

रोचीरोचिष्णुसान्द्रामृतकिरणमणीधोरणीसंनिबद्ध-
प्रासादाधित्यकायां प्रतिमितरजनीनायको निर्बभासे ।
उद्वेलोल्लोलल्लोलज्जलपटलमिलद्दुग्धपाथोधिवस्तु-
र्जातभ्रान्त्या विमुग्धः किमु मिलितुमना आजगामेन्दुसूनुः ॥३८॥

उद्दण्डाखण्डचण्डद्युतिमणिकिरणश्रेणिसङ्कीर्णभित्ति-
निर्वर्ण्य स्पर्धमानं स्वपरमविभवैर्द्वादशात्मीयबिम्बम् ।
दृप्तस्तं जेतुकामो जिनवृषभगृहोऽभ्रङ्कषैः शेखरैः स्वैः
रोषात् संरुध्य तस्यानिलपथपदवीं तस्थिवानेष मन्ये ॥३९॥

निर्धूतामुक्तमुक्तासरनिकरलसत्कण्ठपीठोपकण्ठचोऽ-
न्योऽन्येनोत्पीडिपीनस्तनकलशयुगात् क्रान्तकान्तोर्ध्वकायाः ।
शोभन्ते शालभञ्ज्यस्त्रिदशपतिपुरीयत्पुरी निर्जितश्री-
स्तस्याः संसेवनायाप्सरस इव निजाः प्राहिणोन्मेनकाद्याः ॥४०॥

प्रासादे शेखराणामुपरि विरचितस्वर्णकुम्भावलीनां
सार्धं प्रेङ्ख[द्]ध्वजेनासितनभसि बभे सङ्गतार्चि[र्वि]भाभिः ।
सङ्गोऽभूद वाहिनीनामिव दिवि तिसृणां स्मेरहैमाब्जराजी-
निस्यन्दिस्यन्दपिङ्गीकृतकमनसुता सूर्यजा जाह्नवीनाम् ॥४१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रासादे स्वर्णकुम्भा दधति दिविरुचिं बर्हिबर्हप्रबर्हा
माङ्गल्यस्मेरदूर्वाङ्कितजलकलशाः सूचयन्तः शिवानि ।
सिद्धेः सम्प्रस्थितानामिव पथि मथिताऽनेकदुष्कर्ममर्म-
ध्यानार्चिर्मालिकीलाहुतविषयिहविःशेमुषीभूषितानाम् ॥४२॥

मुक्त्वा संसारकारां शिवपुरगमने वः समीहा यदि स्या-
दभ्येताभ्येत लोकाः सपदि तदखिलं लीलया कर्तुमीशे ।
श्रद्धध्वं चेन्न विष्णोः पदि विधृतकरः स्पर्शनं चित्रभानो
कुर्वेऽदः किङ्किणीनां कणनकपटतो भाषते जैनगेहः ॥४३॥

कुत्राप्युल्लेखकर्मीकृततुरगगजस्पन्दनोन्मत्तपत्ति-
श्रेणीलीलायमानप्रबलबलयुतोऽलङ्कृतो नैकरत्नैः ।
श्रीमत्प्रासादचक्री निचिततमतमःकन्द[रा]या इवासौ
द्वारं निर्वाणपुर्या इव वहतितमां दण्डमुद्घाटनाय ॥४४॥

आलम्बीकृत्य कश्चित् प्रसरति भुवने निम्नगानाथनेर्मी
वान्यः पातालमूलं गलदवधितया स्वैरलीलायमानः ।
वाहस्त्रिस्रोतसोऽन्यो नभसि विगलितालम्बसञ्जातखेदः
प्रेङ्खोलद्वैजयन्तीपटपटुकपटाद् यं समालम्ब्य तस्थौ ॥४५॥

रम्भाभिः श्रीभिरीशैः कविगुरुविबुधैर्नैकसन्तानकल्पै-
र्गौरीभिर्जिष्णुवृन्दैः समुदितपुरुषेषूत्तमैः शेवधीशैः ।
सङ्ख्यातीतैरितीवानणुनिजविभवैर्निर्जराणां नगर्या
विश्वावस्वोकसारा किमु हसितमदः केतुना निर्मिमीते ॥४६॥

तुङ्गिम्ना ज्योतिषा वा परमसुखमया वात्मना स्पर्धमानान्
सर्वान् जैत्रीककारानभिभवपदवीं लम्भयित्वाऽभियातीन् ।
प्रासादः सार्वभौमः स्वशिरसि वहते स्माग्रहग्रन्थिबद्ध-
प्रेङ्खल्लीलापताकापटमिव विजयोद्दीपकोद्दामचिह्नम् ॥४७॥

प्रेङ्खोलत्किङ्किणीनां मधुरिमललितध्वानदत्तावधानं
नादन्ते नो पिबन्ते न च तृणपयसी वीक्ष्य सारङ्गशावम् ।
एणाङ्कः प्राप चित्ते मुदमिति यदसौ पानवल्भे[1] न कुर्वन्
गन्ता प[ ]त्वमन्ते ननु भवति पुरां कक्षितिर्मे यशश्च(?श्च) ॥४८॥

---

१. वल्भो भोजनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


भूमौ द्वीपान्तरे वा निखिलबलिगृहे वासगेहे मघोनो
भूतो भावी भवन् वाऽपरिमितमहिमा मत्सदृक्षोऽत्र कश्चित् ।
भ्रातस्त्वं याहि पश्येत्युपहृतवचनो निक्वणैः किङ्किणीनां
मैत्र्यं कृत्वेव कान्त्या मिथ इति मिहिरं प्रेषयत्याप्तगेहे ॥४९॥

कैवल्योत्फुल्लनीलोत्पलदलनयना दूरदेशाधिवासा-
मौत्सुक्यादीहमानं सहृदयनिवहा भावमन्तर्वहन्तः ।
यत्शृङ्गे किङ्किणीनां बहलितनिनदैः प्रीतिसन्देशमस्या
विज्ञः सम्प्रापयन्त्युत्कलिकितहृदया अन्तराकृत्य चैत्यम् ॥५०॥

पातालं शैलमौलीन् जलनिधिपुलिनान् वाहिनीनां प्रवाहान्
तारामार्गं दिगन्तान् घनगहनगुहाः पौरहूतांश्च गेहान् ।
प्रासादे किङ्किणीनां निनदसमुदयाः सर्वतः पूरयन्तः
श्रीमच्चैत्यावनीन्दोस्त्रिभुवनविजयोद्दीपिनी घोषणेव ॥५१॥

यस्मिन्नुन्निद्रसान्द्रेषु मणिमणिघ्राणोत्कीर्णकुडयौघदर्चिः-
स्तोमस्तम्बेरमारिप्रतिहततिमिरोन्मत्तमातङ्गराशेः ।
लीलाशय्यालिकायां जिनैरजनिपतेर्मुक्तिमत्तेभगत्या
गर्भागारस्य दम्भादिव विरचयितुं नैकधाः स्वैरकेलीः ॥५२॥

तावद् भर्ता पुराणः स वसति जलधौ दृप्तयादोभिरुग्रैः
शेते वा दुष्प्रसह्यः स्मरघनसमये नागराजाधिशय्यः ।
मुद्रास्तव्याकुलास्यां सरसिजशशिनोर्यामि चेत् तात ! लक्ष्म्या
धात्रेतीवार्थितेन स्वसुखवसतये जैनधाम व्यधायि ॥५३॥

उन्मीलच्चञ्चुचित्रीकृतकुमुदवनानन्दनाम्भोजबन्धु-
स्तोमैः संसेवितेनामररमणपुरीलेख्यलीलायितेन ।
वाचां पारप्रयातैर्विभवसमुदयैश्चैत्यभूमी मघोना
मन्ये निर्जित्य बन्दीकृत इव सुमनोभूधरश्चित्रदम्भात् ॥५४॥

कं वा संसक्तनीलोत्पलदलविलुलन्मालिकालब्धलीलैः
कुम्भैराशावसानप्रसृमरकिरणाकीर्णचान्द्रावनद्धैः ।
यस्मिन्नक्षत्रताराग्रहमिलदुदयावृत्तिमार्गावलग्नै-
रभ्युद्गच्छत्सहस्रामृतकिरणमिव व्योम संजायते स्म ॥५५॥

---

१. उत्कलिका संजाता यस्मिन् तत् उत्कलिकितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तःसञ्जातकौतूहलकलित इवानन्तमप्यन्तरिक्षं
श्रीमञ्जनेन्द्रगेहः परिमितविषयीभावमानेतुकामः ।
अन्योन्याश्लिष्यदुद्यद्दिवसमणिमणीधोरणीधूतनूता-
नन्तध्वान्तप्रसर्पद्द्युतिकृतपरिधिभ्राजि दण्डं बिभर्ति ॥५६॥

स्त्यानीभूतामृतांशुद्युतिहरशिखरिस्फीतकर्पूरपारी-
मुक्ताक्षोदावदाता घनपवनचलत्केतवो यत्र रेजुः ।
निक्वाणैः किङ्किणीनामवनिवलिगृहस्वर्गिणां जह्नुकन्या
मन्येऽनेकप्रवाहा इह समुपगताः कुर्वते किंवदन्तीः ॥५७॥

निस्तन्द्रज्योतिरुद्यद्विधुमणिललितोत्तुङ्गशृङ्गान्तराले
वातूलोल्लोलकेतूल्लिखितमकरिकाबिम्बिकायश्चकास्ते ।
आरुह्यात्मीययानं मकरमिव विभोर्गेहमार्गेण गङ्गा
भूमीगङ्गां सगोत्रां मिलितुमिव महीमुत्तरन्ति नभस्तः ॥५८॥

यस्मिन्सान्द्रेन्द्रनीलोपलकृतशिखरश्रेणिलीलाविनिर्यद्-
राजज्योतिःप्ररोहैः परिवृतमभितो भासते केतुवासः[1] ।
शङ्के संरूढशष्पाङ्कितपुलिनतला सिद्धसिन्धुर्वहन्ती
चित्ते रङ्गत्त्रियामापतिहरिणशिशोर्भ्रान्तिरित्याविरासित् ॥५९॥

वक्षःपीठान्मुरारेः स्मितनलिनवनात् स्वःसदां वासगेहात्
प्राणेशात् कौमुदीनामनणुमणिगणात् श्रीमतां वा समूहात् ।
आदायाम्भोजयोनिः सरसिजसदनां भिन्नभिन्नप्रतिष्ठा-
मेकत्रायं दिदृक्षुः कुतुकितहृदयः किं विहारं व्यधत्त ॥६०॥

वेगेनानन्ततारापथचरणवशादन्तरुद्भूतखेदो
भावादालम्बनस्य स्वनिपतनभिया बान्धवोऽम्भोरुहाणाम् ।
यस्मिन्नुत्तुङ्गशृङ्गाङ्गणशिखरशिखाभोगसंलग्नरोचि-
र्व्याजेनेवावलम्बं निजकरनिकरैराददानो विहस्तः ॥६१॥

प्रासादेन प्रसर्पन्निजकरनिकरैः स्पर्धिभावं दधानो
न्यच्चक्रे लीलयाऽसौ बहलकमलया तं पुनर्जेतुकामः ।
तुङ्गिम्ना वा श्रियाऽस्मात् कमपि गुरुतरं भ्राम्यतीवेक्षमाणो
नैवं चेत् किं नु पूर्वापरजलधिभुवि भ्राम्यति द्वादशात्मा ॥६२॥

---

१. वासो वस्त्रम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रासादेनाप्तभर्तुः परमसुषमया लोकचक्षुश्चकोर-
ज्योत्स्नालीलां दधत्या मरुदवनिधरो धिक्कृतिं लम्भितोऽसौ ।
कर्तुं तस्मै प्रसत्तिं पुनरपि किमसौ सर्वतः क्षुद्रचैत्य-
प्रस्थश्रेणीमिषेण व्यरचयदुपदां रत्नसानून्यमूनि ॥६३॥

भूमीपीठावकुण्ठीकृतकठिनहठध्वान्तसन्तानहेतु-
र्यस्मादंशैः प्रवृद्धस्तमपि खरकरं स्वीयभासा जिगाय ।
तस्मादेतत्पुरस्तात् किमणुरहमिहेत्युद्भवद्भूरिभीतेः
पीयूषान्तःप्रवाहै रजनिवरयिता निःसृतैः स्विद्यतीव ॥६४॥

यस्मिन् कुत्रापि नीलोपलकृतशिखरान्निःसृताभांशुदूर्वा-
नव्याङ्कुरभ्रमेणानणुमणिघटितानेकवाहच्छलेन ।
राज्ञा मुक्तावनावात्मन इव तुरगा रक्षितास्ते दशैवा-
शेषाशालङ्घनायै किमुत परिमितास्तस्य नोचेद् भवेयुः ॥६५॥

यस्मिन्निर्यन्मरीचिप्रसृतिपरिचितानेकदिक्खञ्जनाक्षी-
सम्बद्धस्वर्णकुम्भा मरकतनिकरैः कल्पितोत्तानभित्तिः ।
शङ्गश्रेणीविहारो मदयति नयने प्राणिनां प्रावृषेण्या
विद्युद्गर्भेव वर्षोन्मुखसलिलनमन्नूतनाम्भोदमाला ॥६६॥

अन्तःसन्दर्भगर्भीकृतघनकनकोद्दीप्रदीपावमाना-
मानासामान्यनद्धारुणमणिशिखरैरम्बरं गाहमानः ।
सौवर्णाद्रेर्दिदृक्षां शिथिलयितुमहः कौतुकिप्राणभाजा-
मुच्चैरूहे प्रवृद्धस्त्रिभुवनतिलकीभूतजैनेन्द्रगेहः ॥६७॥

शीतांशो ! राजधानी क्वचिदपि तव नो संस्थितिः शून्यदेशे
राज्ञो दर्पं दधानो बलमपि तुरगास्ते दशैते कलङ्किन् ! ।
रात्रौ स्तेयीव चारी सकलगुणभृता किं मया लज्जसे न
स्पर्धिष्णुश्चैत्यराजस्तमिति किमु वदन्निक्वणैः किङ्किणीनाम् ॥६८॥

द्वैराज्यभ्राजिनित्योदयिरजनीकराम्भोजिनीजीवितेश !
द्वैतेनालोक्य शून्यं ग्रहसहितमरुन्मार्गमस्येर्ष्ययेव ।
प्रासादस्येव दम्भादहरहरुदयाद्वैतराज्या स्म धत्ते
बिम्बं पाथोजबन्धोरनणुगुणगणैर्गर्भिता रत्नगर्भा ॥६९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमीरामाललामत्रिभुवनजनताकीर्तितानन्तकीर्तिं
दृष्ट्वा जैनं विहारं हृदि समभिलषन्नेतदीयोपमानम् ।
दोषाभिव्यक्तिभावव्यपनयकरणाबद्धलोलाभियोगी
नित्यत्यागैर्वसूनां द्विजपतिमरुणः प्रीणयामास मन्ये ॥७०॥

ज्योतिर्दण्डैः प्रचण्डैर्नभतलमिलितैस्ताडयन्तं निजं तत्–
स्पर्धिष्णुं श्रीविहारं स्वनयनयुगयोर्गोचरीकृत्य दृप्तम् ।
वह्निं निर्वर्तयित्वा किमु परिधिनिभात् सर्वतस्तं जिगीषु–
र्मध्ये संतिष्ठमानो ज्वलदनलतपः साधयत्यंशुमाली ॥७१॥

प्रासादे जैनचन्द्रे प्रसृतकरभराम्भःप्लवप्लाविताया
विस्फूर्जत्स्फाटिकोर्व्यां प्रतिमितशशभृन्मण्डलं द्योतते स्म ।
मुग्धः प्रोत्फुल्ललीलासरसिजसरसीविभ्रमभ्रान्तचेता
अङ्कप्रक्षालनायाऽऽत्मन इव वियतोऽवातरत् शीतकान्तिः ॥७२॥

शाणाग्रोल्लेखितान्तर्मणिमयमुकुरस्वच्छसच्छायकायो–
द्दामार्चिःपद्मरागोपलपटलकृताधित्यकालम्बिबिम्बः ।
प्रासादेनाभिभूतो ग्रहपथपथिकस्तं पुनर्निर्जिगीषुः
सोऽयं तस्मिन्निलीय स्म वसति किमदः सर्वदोषान् दिदृक्षुः ॥७३॥

निर्वर्ण्योर्जस्वलानां प्रकरपरिभवारम्भलुम्पाकशीलं
कीलश्रेणीकरालज्वलदनलमिलज्जातवेदप्रतापम् ।
वासागारं जिनेन्दोरिदमुदितभयव्याकुलीभूतचेताः
विघ्नः प्राकारगुप्तं धृतपरिधिनिभात् स्वं व्यधत्तांशुमाली ॥७४॥

यातेऽन्यत्रावनौ मामपि परिभवतादन्धकाराभियाति–
र्मुक्तेति स्थावरां स्वामिह जिनपगृहच्छद्मना मूर्तिमेकाम् ।
आशाप्रान्तान्तरीपान्तरघनकुतुकालोकनोत्कण्ठचेता
रङ्गन्मूर्त्याऽन्ययाऽसौ भ्रमति कमलिनीनायकः कौतुकीव ॥७५॥

अन्योन्येनाङ्गलग्नप्रसृतनिजकरैर्गाढमाश्लिष्य हर्षात्–
कर्षैः श्रीमद्विहारः सविधिमभिसरत्पद्मिनीनायकेन ।
व्यक्तीकुर्वन् स्वमैत्र्यं गगनतलमरुद्वेगवेल्लत्पताका-
वेलान्तःकिङ्किणीनां मृदुमधुररवैः स्वागतं पृच्छतीव ॥७६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लीलाकल्लोलितान्तःप्रसृमरकिरणश्रेणिनिर्वर्ण्यवर्ण-
स्वर्णस्तोमावनद्धान्तरविविधमणीकर्मकिर्मीरितश्रीः ।
पातालक्षोणिपीठत्रिदिवविजयिनो यः पराभूय लक्ष्म्या
विभ्रो वेल्लत्पताकापटकपटमयीं कीर्तिलेखां बिभर्ति ।।७७।।

उद्यच्चण्डांशुरोचीरुचिररुचिमणीस्वर्णसम्बद्धभित्ति-
निर्गच्छद्धूपधूमं विहसितसुमनःश्रेणिलीलाभिरामम् ।
तूर्यध्वानैरमानैर्निखिलमपि जगत् पूरयत् पौरहूतं
शेषैर्भाग्यैः सुराणामवनितलमिव प्रापदेतद्विमानम् ।।७८।।

क्रामन् पादेन शेषं दधदचल इवोत्तुङ्गताचङ्गिमानं
कामाधस्तिर्यगुच्चैःप्रसृतकरवरो रोमगुच्छाभिरामः ।
वाद्यद्घण्टाकलापप्रतिनिनदजितोद्गर्जदम्भोदनादः
प्रासादो दानवारिप्रकरपरिचितो यः करीवाबभासे ।।७९।।

भूमीं स्रोतस्विनीं यः शशिकरनिपतच्चन्द्रपाथःप्रवाहैः
संबिभ्रज्जैनमूर्तिं प्रमुदितकमलां चान्तरा स्वर्णकायम् ।
नानारत्नप्रशस्तप्रसृतरुचितनिस्फीतकल्लोलशाली
प्रासादः क्षीरपाथोनिधिरिव समभूद् वाद्यगम्भीरघोषः ।।८०।।

आशासञ्चारिरोचिर्निचयविरचितानेकमाहेन्द्रनील-
स्तोमाप्रोल्लेख्यकर्मीकृतगगनतलोत्तुङ्गशृङ्गश्चकासे ।
मन्ये यद्वर्त्मनाऽसौ निजचिरविरहव्याकुलाङ्गीं धरित्रीम्
त्रस्यत्सारङ्गनेत्रां मिलितुमवतरन्नम्बुमुक्जीवितेशः ।।८१।।

कान्त्या येनाभिभूयाखिलखरकिरणानात्मना स्पर्धमानान्
भीत्येकप्राप्तविष्णुक्रमकजशरणानुद्धृतांस्तानशेषान् ।
द्वेष्यान् सञ्जातरोषादिव घनमिलिताभीशुरज्जुप्रसारैः
संयम्यानन्यहैमान्निपनिवहनिभात्(? न्) रक्षिता जैनधाम्ना ।।८२।।

पारावारान्तरालान् सिकतिलपुलिनान् कन्दरान् गह्वराश्चा-
शेषाशाः दन्दशूकाश्रयसुरसदनक्षोणिपीठप्रदेशान् ।
भ्रान्त्वा श्रान्तान्तरात्मा क्वचन न वसतेरात्मनो योग्यलाभात्
पिण्डीभूय प्रतापः किमिह भगवतो यन्मिषेणाधितस्थौ ।।८३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्ता नित्यास्तभावं शमनजनयिता चाक्षुषः स्वान् करांश्च
प्रत्यूषे प्राणभाजां प्रथयसि पुरतोऽर्थीव निव्रीडभानो !
निर्दोषेऽनाप्तदोषस्त्वमपि सह मया स्पर्धसे किङ्किणीनां
निर्ह्रादैर्भाषमाणः किमिति रचितवांस्ताडनायास्य दण्डम् ॥८४॥

यः शम्भुर्वामदेवः शमनशमयिताऽप्यन्धकारातिहन्ता
पर्यन्यैर्नीलकण्ठः शिखरपरिचितैर्नव्यनाट्यप्रियश्च ।
ईशानासूययान्तःसितघटकपटाद्वा चलद्वैजयन्ती-
व्याजान्मूर्ध्नीव धत्ते शशिसुरसरितोर्द्वन्द्वमाप्तेन्दुगेहः ॥८५॥

ध्वान्तानि ध्वंसमानो धृतचयपरिधिर्गाहमानो विहायः
विस्फूर्जद्व्योमकेतुर्निधिरिह महसां गर्विगन्धर्ववर्गः ।
दोषाविर्भावभेत्तोपगतहरिपदोपास्तिनित्योदयश्रीः
कुर्वाणो यः प्रबोधं किमवनिमगमन्मूर्तिमानंशुमाली ॥८६॥

पौष्पापानोन्मदिष्णुभ्रमदलिपटलश्यामलच्छायमध्या-
श्लिष्यल्लीलाबलाकाततियुगलमिलत्प्रावृषेण्याब्दमाला ।
रेजे यस्योपरिष्टात् त्रिभुवनविजयोद्भूतगर्वं दधानोऽ-
न्तर्मेघाडम्बरं यश्चलचमरयुगच्छत्रमूहे बिभर्ति ॥८७॥

यस्मिन् पुष्पोपचारः क्वचन विरचितः सञ्चरच्चञ्चरीक-
श्रेणीझङ्कारगीतध्वनितपरिचितानेकवीणाविनोदः ।
सर्वो नक्षत्रताराग्रहनिवह इव श्वेतरोचिर्विभूषा-
सामान्यं याचमानः प्रभुमिव भजतेऽभ्येत्य नक्षत्रवीथ्याः ॥८८॥

उत्फुल्लत्पर्णमालागलदमलमधुस्यन्दलुभ्यद्द्विरेफं
प्रासादे पुण्डरीकं विलसति परितः क्लृप्तकान्तोपचारम् ।
स्वर्भाणोर्भीरुचेता निजमखिलपरीवारमादाय सार्धं
मन्ये यस्मिन्निलीया स्थितिमयमतनोत् कौमुदीनामधीशः ॥८९॥

उद्भ्राम्यद्भृङ्गरामासमुदयविविधानोकहोन्निद्रनिर्यत्-
पौष्पौघस्यन्दबिन्दूपचितसुमनसां भाति यत्रोपचारः ।
निर्जित्याद्वैतवीरं कुसुमशरमहीपालमेतस्य शक्तेः
शस्त्राण्यादाय वासौकसि किमु भगवद्भूभुजा धारितानि ॥९०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


आत्मीयाभातिरेकैर्विहसितविगलद्वारिवाहोपरोध-
स्मेरार्चिःशारदीनोदिततुहिनकरं यत्र शृङ्गं बभस्ति ।
भूमिभृत्पक्षभेत्तुः प्रबलबलभिदः स्वं लघूकृत्य भीत्या
शैलः शीतांशुमौलेरिव शरणमगादर्हतो वासवाम्नः ॥९१॥

ज्योतीराजीनिबद्धाग्रहनिवहचलत्केतुचक्रान्धकार-
च्छेत्तारश्चान्द्रवारा हरिपदपटलीस्ववंहा वैजयन्त्यः ।
सन्त्येते मय्यनेके मदुपरि तदरेऽस्थाः कथं ताडनायै
कुर्वन्नुद्योगमर्हद्गृह इव कृतवान् दण्डमुद्दण्डमुच्चैः ॥९२॥

चञ्चद्झाङ्काररावाधरितसुरवधूधोरणीनृत्यगीत -
प्रोन्माद्यद्भृङ्गमालाकलितसुमनसां राशिरस्मिश्चकासे ।
संप्रापं सौमनस्यं तव परिचरणादेतदुच्चैः पदं मां
देहि श्रीमज्जिनेन्दोरगमदिति महानन्दकाङ्क्षीह मन्ये ॥९३॥

शोचिःश्रेणीसनाभीकृतनिखिलमिलत्पद्मिनीप्राणनाथ-
प्राञ्चन्नानामणीभिर्घटितयुदवनीनूतनाधित्यकायाम् ।
शोभां कामप्यनन्यां कलयति नलिनीवल्लभो बिम्बबिम्बः
लक्ष्मीं मन्येऽदसीयां मितिविषयमिवानेतुमुद्यच्छतेऽसौ ॥९४॥

निर्धूतानेकमुक्तास्तबकसमुदयाश्लिष्टलीलान्तराल-
श्चञ्चच्चन्द्रोदयोऽस्मिन् क्वचिदसितमणीकान्तसंपृक्तकान्तः ।
बिम्बेनोवाह शोभां व्यपकुरु जिन ! मे शून्यतां सग्रह ! त्वं
मन्ये नक्षत्रवीथी गदितुमिदमहोरात्रमेनं निषेवे ॥९५॥

स्थाने स्थाने प्रलम्बीकरणपरिचितान्यात्तभूचन्द्रवासे
जालान्युन्मीलदिन्दुद्युदमृतमिहिकाकान्तमुक्तावलीनाम् ।
निर्वर्ण्यानन्यनिर्यद्बहलतरमधुस्यन्दसन्दोहलिप्सु-
र्भ्राम्यन्ती फुल्लपुष्पस्तबकततिधियेवाभ्यगाद् भृङ्गमाला ॥९६॥

येनानङ्गीकृतं स्वं प्रणयिनमवनीनायकं पद्मवासा-
सूनुं दृष्ट्वेदमीया विमुदितपरमाणूदरी व्याकुलाङ्गी ।
आदायेवात्मनीनं सकलमपि परीवारमङ्गं स्वपत्युः
पञ्चालीकैतवेनार्थयति पुनरसौ यत्र शम्भोः पुरस्तात् ॥९७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आप्तक्षोणीतलेन्दोरमललवणिमानन्यसामान्यरूपं
सर्वाङ्गीणं त्रिलोकीविजयकृदतिथीकृत्य नेत्रोत्पलाभ्याम् ।
व्याजात् पाञ्चालिकानां भयतरलमृगीलोचना निर्झरणा–
माश्चर्याकूतभावादिव सममभवन् स्तम्भिता जैनगेहे ॥९८॥

वल्गल्लावण्यलीलावगणितफणिभृल्लोकनीलोत्पलाक्ष्यः
कल्लोलं ह्वन्मुदम्भोनिधिपयसि नृणां शालभञ्ज्यः सृजन्ति ।
खेलल्लीलायमानाम्बुधिशयनशरच्चन्द्रविद्वेषिवक्त्रा
स्नेहेनाभ्याजगाम प्रवरसहचरीवाप्सरोमालिकेयम् ॥९९॥

यस्मिन् विस्मेरदम्भोरुहदलनयनाः स्तम्भनद्धा नताङ्ग्यः
पाञ्चाल्यः फुल्लयन्ति स्म नयनकुमुदां वृन्दमिन्दोरिवाल्यः ।
प्रान्तावासं जिनेन्दो ! व्यपनय किमिदं वक्तुकामाः पुरस्ता–
दाशासारङ्गनेत्रा इव जिनसदने यत्र सम्भूय तस्थुः ॥१००॥

धौतस्फीताश्मगर्भप्रकरपरिचितानन्यसोपानपङ्क्तिः
प्रोच्चैर्यत्कुट्टिमान्तः किमपि नयनयोः कौतुकं तन्तनीति ।
कालिन्दीवोत्तरङ्गा कनककृतशिखालम्बिकुम्भेऽब्जबन्धो–
र्भ्रान्त्या वप्तारमेनं मिलितुमिव मुदोपक्रमं कुर्वतीह ॥१०१॥

यस्मिन्नुर्जस्वलश्रीः क्षपितघनतमःकोटिविस्पष्टरोचिः
सौवर्णस्तम्भमालाशितिमणिकिरणश्रेणिमिश्रान्तराला ।
श्रीमत्स्याद्वादिगेहे पुलकयति तनूं कौतुकालोककानां
बिभ्राणा नीलवासो दिवसपतिसुता प्रत्यनीका इवैते ॥१०२॥

इति श्रीमज्जैनविहारशतकम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसोमसुन्दरसूरिकृतं

# श्रीवीरजिनस्तवनम् ।

## संपादक. पं. बाबुभाई सवचंद शाह

अद्यावधि अप्रगट आ चमत्कारिक श्रीवीरस्तवनरूप लघु स्तवनन कर्त्ता प्रसिद्ध तपगच्छीय आचार्य श्रीसोमसुन्दरसूरि छे. तेओश्री भगवान महावीरना पचासमा पटधर थया. वि.सं. [1]१४५७ मां तेओ सूरिपदे स्थापित थया. तेमनो समय वि. सं. १४३० थी १५०० सुधीनो सुनिश्चित छे. तेमणे नाना मोटा अनेक ग्रंथो रच्या छे.[2] तेमांना घणा छपाई गया छे.

आ कृतिनुं संपादन लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिरमां रहेल पंन्यास श्रीकल्याणविजयजी संग्रहनी प्रति नंबर ५४५/४ उपरथी करेल छे. प्रतिनुं परिमाण २६. ३ × ११. ४ से. मी. छे. प्रति सत्तरमा शतकमां सुवाच्य अक्षरे लखायेली छे. एक पत्रमां लगभग पंदर पंक्तिओ छे. एक पंक्तिमां सरेराश ५६ अक्षरो छे.

आ कृतिना शरूआतना सात श्लोको उपजाति छंदमां अने छेल्ला बे श्लोको शार्दूलविक्रीडित छंदमां छे. सातमा श्लोकमां श्लेषगर्भित यमकबद्ध रचना छे. अंतिम श्लोकमां नाणा, घाणक, नंदिवर्धनपुर, हस्तिकुंडीपुरी, ब्राह्मणवाटक वगेरे तीर्थोनो उल्लेख करेल छे. वळी ते ज श्लोकमां जीवति श्रीवीरे आ पद मूकीने श्रीवीर भगवंतनी विद्यमानतामां आ तीर्थोमां स्थापन करायेली मूर्तिओने नमस्कार करेल छे.

### श्रीसोमसुन्दरसूरिकृतं
### श्रीवीरजिनस्तवनम् ।

छत्रत्रयालङ्कृतमौलिमण्डनम्
संवीज्यमानं चमरैः सुरेश्वरैः ।
जिनाधिराजं मृगराजविष्टरो–
पविष्टमेकं प्रभुवीरमानुमः ॥१॥

गङ्गातरङ्गा इव चङ्गशुद्धताः
त्रिलोकलीलाक्रमविक्रमोद्धताः ।
गुणास्तुरङ्गाः कियतोऽपि यांस्तव
श्रितैः सुखाप्यः कविसादिभिर्जयः ॥२॥

१. पट्टावली समुच्चय पृ. ६४–६५. (प्रका० चारित्रस्मारक ग्रंथमाला, वीरमगाम.)
२. जैन साहित्यनो संक्षिप्त इतिहास. मो. द. देसाई. पृष्ठ ४५१ थी ४६१.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तव प्रभावस्तनुभूरजल्पतोऽ—
प्यनल्पसङ्कल्पितरोषतोषणः ।
त्वदङ्गणाग्रे युवराजवज्जवाद्
यात्रामिषाल्लोठयते जगत्त्रयीम् ॥३॥

आज्ञा परेषां न रराज निर्जरे—
श्वरादिकानां प्रभवेत् सचेतने ।
अचेतनैरप्यनलाम्बुविद्युदा—
दिकैस्त्वदाज्ञा तु न लङ्घ्यतेऽद्भुतम् ॥४॥

स्यादैहिकानेकपदार्थसिद्धये
श्रद्धा जिनाधीश ! यथा प्रथावती ।
तथाऽत्रपारत्रिकशर्मनिर्मिता—
वुपायभूता त्वयि सा ममाऽनिशम् ॥५॥

पुरः स्फुरद्धूपजधूमडम्बरम्
चिरं सृजन्तोऽपि तवेह देहिनः ।
स्वमुज्जज्वलैः पुण्यदलैर्वरीभ्रति
त्रिलोकमात्मीययशोभिरप्यहो ! ॥६॥

न राजयक्ष्मादिकदूषिताः स्युः
नरा जयक्ष्मादिकराज्यऋद्धाः ।
प्रभावतस्ते रवितोऽतिशायि—
प्रभावतस्तेन न के स्तुयुस्त्वाम् ॥७॥

तेजोभिर्विजितो रविः सह परीवारेण बद्धाञ्जलिः ।
पादाग्रे तव सेवनां विरचयत्येकाग्रचित्तः सदा ॥
तत् किं तस्य सुतः शनिस्तनुभवा भद्रा तनूजस्तथा ।
कीनाशस्तदधिष्ठिता च भरणी त्वद्भाक्तिकां(कानां) पुरः ॥८॥

नाणद्याणकनन्दिवर्द्धनपुरश्रीहस्तिकुण्डीपुरी—
श्रीमद्ब्राह्मणवाटकेषु बृहति ग्रामे तथा जीवति ।
श्रीवीरे क्षितिपालमुख्यविपुलप्रासादसंस्थापिताः
तन्मूर्तीः गुरुसोमसुन्दरमहःकीर्त्तिर्नमाम्यन्वहम् ॥९॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



# પ્રિયામિલન

## ઉજાણીએથી પ્રત્યાગમન

પછી વાવને કાંઠે બેઠેલી અને સ્નાન, શણગાર વગેરે કરવામાં રચીપચી અમ્માને જોઈને હું તેની પાસે ગઈ. (૪૦૪). ભૂંસાઈ ગયેલી બિંદીવાળું, સહેજસાજ બચેલા આંજણ યુક્ત રાતાં નયનવાળું, ખિન્ન બનેલું ને પ્રભાતકાળના ચંદ્ર સમુ ફીકું એવું મારું વદન જોઈને વિષાદ પામતી અમ્માએ કહ્યું, 'બેટા, ઉદ્યાનમાં ભમવાના થાકથી તું કરમાયેલી ઉત્પલમાળાના જેવી શોભાહીન બની ગઈ કે શું ?' (૪૦૫–૪૦૬). એટલે પ્રિયતમના વિયોગે દુઃખી, સર્વસ્વ હરાઈ ગયું હોય તેવી હું આંસુ ભરેલી આંખે બોલી, 'મારું માથું દૂઃખે છે.' (૪૦૭). 'તો બેટા, તું નગરમાં પાછી જા,' 'મારાથી એક ડગલું પણ દઈ શકાય તેમ નથી. મને દુઃખના નિધાન સમો તાવ ચડયો છે.' (૪૦૮). એ વચન સાંભળીને અત્યંત ખિન્ન બનેલી મારી વત્સલ માતાએ કહ્યું, 'તું સ્વસ્થ થાય તે પ્રમાણે કરીશું. (૪૦૯). હું પણ નગરીમાં ન આવું, તો આવી દુર્દશામાં તને એકલી કેમ મૂકું ? મારી પુત્રી આખા કુળની... '(૪૧૦). એ પ્રમાણે કહીને પુત્રી પ્રત્યેના અતિશય સ્નેહવાળી અમ્માએ શયનવાળું એક ઉત્તમ વાહન મારે માટે જોડાવ્યું. (૪૧૧). પછી પેલી મહિલાઓને તેણે કહ્યું, 'તમે સૌ સ્નાનશણગાર કરી, ભોજન પતાવીને વેળાસર પાછી આવી જજો, હોં, મારે જરા નગરમાં જવાનું છે, કાંઈક તાકીદનું અનિવાર્ય કામ છે, પણ તમે કશી ચિંતા ન કરશો.' એ પ્રમાણે તે બધીને સારું લાગે તેમ કહ્યું. (૪૧૩). ઉજાણીના આનંદોત્સવમાં સ્ત્રીઓને કશો અંતરાય ન પડે એ દૃષ્ટિએ અમ્માએ પોતાનું નગરીમાં પાછા ફરવાનું ખરું કારણ ન કહ્યું. (૪૧૪). સાથેના સૌ રક્ષકો, દેખરેખ રાખનારા વૃદ્ધો અને કંચુકીઓને પોતપોતાના કાર્યમાં બરાબર સાવધ રહેવાનું કહીને, થોડાક પરિવારને અને અનુભવી પરિચારકોને સાથે લઈને તે વાહનમાં બેસીને અમ્મા મારી સાથે નગરીમાં આવી. (૪૧૫–૪૧૬). વાસભવનમાં તળાઈવાળા...(૪૧૭). ગળાના હાર ફેંકી દઈને...કાનનું કુંડળયુગલ... (૪૧૮). એટલે અમ્માએ કહ્યું. 'તરંગવતીના શરીરમાં તોડ છે. માથું પણ સ્વસ્થ નથી. એટલે ત્યાં તેને વધુ રહેવાનું ગોઠયું નહીં.' (૪૧૯). જેના નિમિત્તે હું ઉદ્યાનમાં ગઈ, તે સપ્તપર્ણનું વૃક્ષ સરોવરની સમીપમાં ઊગેલું અને ફૂલથી ઢંકાઈ ગયેલું મેં જોયું. (૪૨૦). સૌ સ્ત્રીઓને ઉદ્યાનમાં રમણભ્રમણ કરવામાં કશું વિઘ્ન ન થાય એ હેતુથી મેં મારા પાછા ચાલી આવવાનું સાચું કારણ તેમને નથી જણાવ્યું.' (૪૨૧). એ વચન સાંભળીને મારા પર પુત્રો કરતાં પણ વધુ સ્નેહબંધવાળા બાપુજી અધિક વ્યાકુળ અને દુઃખી થયા. (૪૨૨).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



महिला-जणस्स विग्धो मा होज्जा उववणम्पि रमउं ति ।
आगमण-कारणं तो न मए सब्भावओ कहियं ॥४२१
एयं निसग्ग वयणं संभंतो अहिय-दुक्खिओ ताओ ।
अइरेय-बद्ध-नेहो पुरोहिंतो · मह उवरि ॥४२२

❀

अम्मा-कहिए नायम्मि आणिओ नय-विहण्णुओ वेज्जो ।
विज्जा-गुणेण जो नयरे सयले खाय-कित्तीओ ॥४२३
उत्तम-कुल-प्पसूओ गंभीरो सील-पच्चय-समिद्धो ।
सुह-हत्थो सिव-हत्थो लहु-हत्थो सत्थ-कुसलो य ॥४२४
सो सव्व-वाहि-लक्खण-नियाण-निग्गह-पओग-विहि-कुसलो ।
पुच्छइ सुहासणत्थो विवरिय-अत्थं ममं तत्थ ॥४२५
किं ते बाहइ बलियं जरो य सिरवेयणा य तं साह ।
पत्तिय(?) तं वेलं जा ते सव्वं पणासेमि ॥४२६
केरिसओ आहारो कल्लं आसी य अवि य ते जिण्णं ।
निहावण यण-मुद्दा (?) कह ते रत्ती गया अज्जं ॥४२७
कहिओ मे आहारो सारसियाए निद्दाए पज्जंतो ।
उववण-गमणं च महं जाइ-स्सरणं विणा घरिणि ॥४२८
दट्ठूण पुच्छिऊण य आलक्खेउं ममं च गहियत्थो ।
सो जंपिउं पवत्तो सत्थावत्था इमा कण्णा ॥४२९

❀

जं लोए जिमिय-मेत्तो होइ जरो सिंभिओ मुणेयव्वो ।
पित्तं (?) जरो जरत जिण्णंते बाइओ होज्जा ॥४३०
एएसु तिसु वि कालेसु हवइ सो सण्णिवाइओ होइ ।
तस्स वि य पबल-सेसो (?) बहुया दोसा मुणेयव्वा ॥४३१
दोसा अहवा तिण्णी एत्तो किर लक्खणाणि सयराह' ।
दीसंति जत्थ सो सण्णिवाय-जरओ मुणेयव्वो ॥४३२
दंड-कस--सत्थ-पत्थर-पहार-दुम-पडण-पेल्लणादीहि ।
संभवइ जो विसेसेण सो उ आगंतुओ जरओ ॥४३३
एतेसिं एक्कयरं अहयं जं लक्खणं न पेक्सामि ।
सत्था हु होह तुब्भे सत्थ-सरीरा इमा कण्णा ॥४३४
जाण-क्खोभेण धुया उववण-परिहिंडणा[ए] किलम्मिया ।
जाणइ जरो त्ति बाला परिस्सममिमं सरीरस्स ॥४३५
अहवा चित्त-वियारो कोई एयाए सोग-डर-जणिओ ।
तेणुव्विग्गा बाला लक्खिज्जइ नण्णहा एसा ॥४३६
इय भाणिऊण य तहिं अम्मं तायं च हेउ-जुत्तीहिं ।
कय-सम्माणो भक्णाओ नीइ विसज्जिओ वेज्जो ॥४३७

❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## વૈદરાજનું આગમન

અમ્માની સલાહથી વૈદ્યને બોલાવ્યો. તે વિવેકબુદ્ધિવાળો અને પોતાની વિદ્યાના ગુણે આખા નગરમાં પ્રખ્યાત હતો; ઉત્તમકુળમાં જન્મેલો, ગંભીર સ્વભાવનો અને ચારિત્રવાન હતો; શાસ્ત્રનો જાણકાર હતો, અને તેનો હાથ શુભ, કલ્યાણકારી અને હળવો હો. (૪૨૩–૪૨૪). બધા પ્રકારની વ્યાધિઓના લક્ષણ, નિદાન અને નિગ્રહમાં તથા તેમતેને લગતા પ્રયોગવિધિમાં કુશળ એવો તે વૈદ્ય નિરાંતે આસન પર બેસીને મને વિગતે પૂછ-પરછ કરવા લાગ્યો (૪૨૫): 'મને કહે, તને વધારે કષ્ટ શેનાથી થાય છે—તાવથી કે માથાના દુઃખાવાથી? તું વિશ્વાસ રાખ. આ ઘડીએ જ તારું બધું કષ્ટ હું દૂર કરી દઈશ. (૪૨૬). તેં ગઈ કાલે ભોજનમાં શું શું લીધું હતું? તને ખાધેલું બરાબર પચ્યું હતું? તારી રાત કેવી રીતે ગઈ, આંખોને બીડી દેતી ઊંઘ બરાબર આવી હતી?' (૪૨૭). એટલે સારસિકાએ મેં જે કાંઈ રાત્રે આહાર કર્યો હતો તે, તથા પૂર્વ જન્મના સ્મરણ સિવાયની ઉજાણીએ ગયાની વાત કહી જણાવી. (૪૨૮). એ પ્રમાણે પૂછીને અને મને જોઈતપાસીને વસ્તુસ્થિતિનો મર્મ પામી જઈ વૈદ્ય કહેવા લાગ્યો, 'આ કન્યાને કશો રોગ નથી.

## જ્વરના પ્રકાર

લોકોને જમ્યા પછી તરત આવતો જ્વર કફજ્વર હોય, પાચન થતાં જે જ્વર આવે તે પિત્તજ્વર અને પાચન થઈ ગયા પછી આવતો જ્વર તે વાતજ્વર હોય. (૪૩૦). આ ત્રણેય વેળાએ જે જ્વર આવે તે સન્નિપાત-જ્વર હોય, જેમાં ઘણા પ્રબળ દોષો રહેલા હોવાનું જાણવું. અથવા તો જેમાં ઉક્ત ત્રણેય પ્રકારના જ્વરના દોષ અને લક્ષણો વરતાય તેને સન્નિપાત-જ્વર જાણવો. (૪૩૧–૪૩૨). વળી દંડ, ચાબુક, શસ્ત્ર, પથ્થર વગેરેના પ્રહારને લીધે, ઝાડ પરથી પડવાથી કે ધકકેલાવાથી—એવા કોઈ વિશિષ્ટ કારણે ઉત્પન્ન થતા જ્વરને આગંતુક જ્વર જાણવો. (૪૩૩). આ જ્વરોમાંથી એકેયનું લક્ષણ મને અહીં દેખાતું નથી. માટે તમે નિશ્ચિંત રહો, આ કન્યાનું શરીર તદ્દન સ્વસ્થ છે. (૪૩૪). લાગે છે કે તમારી પુત્રી ઉદ્યાનમાં ભ્રમણ કરીને અને વાહનની અથડામણથી થાકી ગઈ છે. આ શારીરિક પરિશ્રમ છોકરીને જાણે કે જ્વર હોય એવો લાગે છે. (૪૩૫). અથવા તો પછી ભારે શોક કે ડરને લીધે આને કશો ચિત્તવિકાર થયો હોય, જેથી કરીને આ છોકરી ખિન્ન બની ગઈ હોય. આમાં બીજું કશું કારણ નથી.' (૪૩૬). એ પ્રમાણે અમ્માને તથા બાપુજીને કારણો તથા દલીલોથી સમજાવીને, સન્માનપૂર્વક વિદાય કરાયેલો વૈદ્ય અમારે ઘેરથી ગયો. (૪૩૭).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अहयं पि तत्थ दुहिया सोग-भरक्कंत हियय-दुक्खत्ता ।
जेमाविया स-सवहं अम्माए वरण्ह-कालम्मि ॥४३८

मज्जण-जेमण-मंडण-पमोय-संभोय-वइयर-विसेसे ।
साहंति य विलयाओ उज्जाणाओ नियत्ताओ ॥४३९

सायर-रंग-परंगिय-तलम्मि सयणम्मि मे असरणाए ।
निद्दा-वु(तु?)च्छच्छीए किच्छेण अइच्छिया रत्ती ॥४४०

पुरिस-सया किर कल्लं ममं वरेउं उवट्ठिया तायं ।
जे मयण-बाण-विद्धा दट्ठूण ममं गुरू तेसिं ॥४४१

ते य किर असरिसे मे सील-व्वय-नियम-पोसह-गुणेहिं ।
ललिया वि अत्थइत्ता पडिसिद्धा सेट्ठिणी सव्वे ॥४४२

तस्स कहा-गुण-कित्तण-पसंग-परिवत्तिओ पुणो बहुसो ।
अच्छीसु ओयरिज्जइ पाणिय-रूवो महं सो उ ॥४४३

धणियमणुसंभरंतीए मज्झ तं पुव्व-देह-संबंधं ।
सा कुद्धा य रुट्ठा(?) भोयण-सद्धा परद्धा मे ॥४४४

मज्जामि पसाहेमि य अकामा(?) मे विसं व तं घरिणि ।
गुरुयण-परियण-चित्त-परिरक्खणत्था दुहट्टा वि ॥४४५

खणमवि न हु जीवेज्जा तेण विणा तस्स लंभ(?)-परिहीणा ।
जीविय-कल्लोला मे मणोरह-मया जइ न होज्जा ॥४४६

बाहइ मं उउ-चंडो वम्मह-कंडो पकाम-हिंडणओ ।
सुहिय-जण-निव्वुइ-करो सत्तच्छय-गंधिओ वाओ ॥४४७

तिमिर-पडिनासयाणं खणमवि मयण-सर-सण्णिवायाणं ।
न चएमि ठाइउं जे आवाए चंद-पायाणं ॥४४८

कुमुय-वण-अमय-वुट्ठी मंदर-घट्ठी पगाम(?)-परितुट्ठी ।
तह सीयला वि जोण्हा उण्हा विव मे डहइ अंगं ॥४४९

पंचविह-इंदियत्था इट्ठा विसय-सुह-निव्वुइ-करा मे ।
ते पिययमेण रहिया य घरिणि सोयं उईरंति ॥४५०

सव्व-मणोरह-संपूरयं व संकप्पियं मए तत्थ ।
तस्स समागम-हेउं विहियं आयंबिलट्ठ-सयं ॥४५१

सव्व-दुह-विणासणयं पभवं च सव्व-सोक्खाणं ।
अणुमण्णइ य गुरु-यणो तं मज्झ वयं अणुणयंतो ॥४५२

आयंबिल-वय-करणेण दुब्बलं सयण-परियणो मज्झं ।
जाणइ न हु मं जाणइ वम्मह-सर-सोसियं तणुइं ॥४५३

❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## વિરહાવસ્થાની વ્યથા

પછી ભારે શોકથી તપ્ત હૃદયવાળી અને દુઃખાર્ત બનેલી મને અમ્માએ સોગંદ દઈ ને બપોરે જમાડી. (૪૩૮). ઉજાણીએથી પાછી ફરેલી પેલી મહિલાઓ પણ સ્નાન, શણગાર, ભોજન ને આનંદપ્રમોદના અનેક પ્રસંગો વર્ણવા લાગી. (૪૩૯). નીલરંગી શયનમાં અશરણ બનીને સૂતાં, નિદ્રારહિત આંખોએ મારી એ રાત્રી કેમેય કરીને વીતી. (૪૪૦). કહે છે કે આગલે દિવસે મને જોઈ ને જેઓ મદનનાં બાણથી વીંધાઈ ગયા હતા, તેમના જેઓ વડીલ હતા તે સેંકડો પુરુષો બાપુજી પાસે મારું માગું કરવા આવેલા. (૪૪૧), પરંતુ ઉમેદવારો રૂપાળા હોવા છતાં, શીલ, વ્રત, નિયમ અને ઉપવાસના ગુણોમાં તે બધા મારા સમોવડ ન હોવાથી, હે શેઠાણી, તેમનો બાપુજીએ અસ્વીકાર કર્યો. (૪૪૨). એને લગતી વાતોના અને ગુણકીર્તનના પ્રસંગોમાં વારંવાર નિર્દેશ પામતો મારો પ્રિયતમ જ મારી આંખોમાં પાણી રૂપે ઊતરી આવ્યા કરતો હતો. (૪૪૩). પહેલાંના એ મારા દેહસંબંધનું વારંવાર સંસ્મરણ કરતી એવી મારા ઉપર જાણે કે ક્રોધે ભરાઈને-રિસાઈને મારી ભોજનરુચિ ચાલી ગઈ. (૪૪૪). હે, ગૃહસ્વામિની, હું દુઃખીદુઃખી હોઈ ને, સ્નાન અને શણગાર મને ઝેર જેવા લાગતાં; તોપણ, વડીલો અને કુટુંબીજનોથી મારો હૃદયભાવ છુપાવવા, હું તે નીરસપણે કર્યે જતી. (૪૪૫) જો મનોરથરૂપી તરંગો મારા જીવિતમાં પ્રસરેલા ન હોત, તો હું તેના સંગથી વિયુક્ત રહીને એક ક્ષણ પણ જીવી ન શકત. (૪૪૬). સ્વૈરપણે ભ્રમણ કરતો, કામદેવના બાણ જેવો, સપ્તચ્છંદની સૌરભ-વાળો, સુખી લોકોને શાતા આપતો, ઋતુને લીધે પ્રચંડ એવો પવન મને પીડતો હતો. (૪૪૭). કંદર્પના બાણની વર્ષા થતાં જેમને કામજ્વરનો સંનિપાત થઈ આવ્યો છે, તેવા, તિમિરની પ્રતિમા સમાં (?) લોકોને ચંદ્ર એક ક્ષણ પણ રુચતો નથી. (૪૪૮). કુમુદવનને અમૃતવૃષ્ટિ સમી...અત્યંત પરિતૃપ્તિ કરતી શીતલ જ્યોત્સ્ના પણ ઉષ્ણ હોય તેમ મારા અંગને દઝાડતી હતી. (૪૪૯). હે ગૃહસ્વામિની, વિષયસુખની તૃપ્તિ કરવતા પાંચ પ્રકારના ઇષ્ટ ઇંદ્રિયાર્થો, મારા પ્રિયતમ વિના મને શોક ઉપજાવતા હતા. (૪૫૦). તે વેળા મેં પ્રિયતમને પામવા માટે, સર્વે મનોરથ પૂરા કરનાર એકસો ને આઠ આયંબિલ કરવાનો સંકલ્પ કર્યો. (૪૫૧). સર્વે દુઃખનું વિનાશક અને સર્વે સુખનું ઉત્પાદક એવું એ વ્રત કરવા માટે, મારું મન રાજી રાખતા વડીલોએ મને સંમતિ આપી. (૪૫૨). હું આયંબિલ વ્રત કરવાથી દૂબળી પડી ગઈ હોવાનું મારા સ્વજનો અને પરિજનોએ માન્યું; કામદેવના બાણથી હું શોષાઈને કૃશ બની ગઈ હોવાનું તેઓ ન કળી શક્યા. (૪૫૩).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तो दुक्ख-वेद-संतावियाए मे हियय-सोग विस्सामो ।
आलेक्ख-कम्म-जोग्गो निम्मविओ पट्टओ घरिणि ॥४५४

दढ-पासिय-मसिणाओ जुत्तीएहि दिण्ण-माण-वद्धाओ(?) ।
कासि म्हि वट्टिआओ बहु-वण्णा-सण्ह-वण्णाओ ॥ ४५५

उभओ तिक्खग्गाओ अवक्खडा तह पमाण-जुत्ताओ ।
परिसण्ह-निद्ध-लेहा पाणीसु वि उज्जमंतीओ ॥४५६

ताहि य मे तं लिहियं तम्मि पडे चक्कावाय-जाईयं ।
जं मे पिएण सहियाए समणुभूयं पि(?) निरवसेसं ॥४५७

जह रमियं जह चरियं विद्धो य मओ य सहयरो जह मे ।
जह खामिओ य वाहेण अणुमया तं जहा अहयं ॥४५८

तत्थेव मए लिहिया भागीरहिणोवइट्ठ-गइ-मग्गा ।
गंगा उयहि-तरंगा रहंग-नामा उलि(?) विहंगा ॥४५९

हत्थी य सो वयत्थो वाह-जुयाणो य गिहिय-कोयंडो ।
तत्थ लिहिया मए तो कमेण वट्टीए चित्तम्मि ॥४६०

पउमसरो य बहु-विहा रुक्ख-कडिल्ला य दारुणा अडवी ।
कमल-सहस्साकिण्ण-उउ-काल-समण्णिया लिहिया ॥४६१

अच्छामि य पेच्छंती कुंकुम-वण्णं तयं रहंगं च ।
मह मण-रमणं चित्त-गयं(?) अणण्ण-चित्ता हं ॥४६२

❀

× × × तइया वि दिणे गुण-विविह-नियम-विवेल्लिया ।
× × × × × गुण-पवित्तो आसण्णा कोमुई-रत्ती ॥ ४६३

लागदाराणि अवंगु-पाणिमाधाय(?) घोसणा वत्ता ।
धम्मो विव सुह-करणी निण्हय-करणी य अहम्मस्स ॥४६४

उववास-दाणमइयं वदाणि संघस्स(?) तेण तत्थ जणो ।
कुणइ विहि-निप्पकंपं(?) दिय-भोय-विमाण-सोमाणं(?) ॥४६५

कोमुइ-पुण्णिम-दिवसो जं आओ(?) घरिणी कमेण संपत्तो ।
धम्मस्स कारवणओ दिय-जण-दोगच्च-नासणओ ॥४६६

अम्मा-पिईहिं (सहिया) कांसी चाउम्मासाइयार-सोहणयं ।
खमणं पडिकमणं पारणं च अहयं पियेच्छीयं (?) ॥४६७

हम्मिय-तल-ओलोयण-गया य पव्वावरण्ह-कालम्मि ।
ओलोएमि पुरवरिं सग्ग-विमाणोवम-सिरीयं ॥४६८

पेच्छामि दुद्ध-धवले विण्णाणिय-सुकय-चित्तिय-क्खंभे ।
गयण-तलमणुलिहिंते विमाण-पडिरूवए भवणे ॥४६९

❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## ચિત્રપટનું આલેખન

પછી હે ગૃહસ્વામિની, વિરહદુઃખે સંતપ્ત બનેલી મેં હૃદયના શોકથી વિસામો મેળવવા, ચિત્રકર્મ માટે યોગ્ય એવો એક પટ્ટ તૈયાર કરાવ્યો. (૪૫૪). મજબૂત પાસથી બાંધેલી, યોગ્ય માપની, ઝીણા વાળ વાળી, મસૃણ, સુંદર પીંછીઓ તૈયાર કરાવી; બંને બાજુ તીક્ષ્ણ અગ્રવાળી, ઉપસ્કૃત, સપ્રમાણ, ઝીણી, સ્નિગ્ધ રેખા પાડતી અને હાથમાં ઉત્સાહ પ્રેરે તેવી તે હતી (૪૫૫–૪૫૬). તેમના વડે મેં તે ચિત્રપટમાં જે કાંઈ ચક્રવાકી તરીકેના ભવમાં મારા પ્રિયતમની સાથે મેં અનુભવ્યું હતું તે બધું જ આલેખ્યું. (૪૫૭) : જે રીતે અમે રમતાં અને વિહરતાં, જે રીતે મારો સહચર વિંધાયો અને મરણ પામ્યો, જે રીતે વ્યાધે તેને ખમાવ્યો, અને જે રીતે મેં તેની પાછળ અનુમરણ કર્યું. (૪૫૮). વળી મેં ભાગીરથીનાં વહેણ, સમુદ્રસમા તરંગવાળી ગંગા અને તેના પટમાં રથાંગ નામધારી (=ચક્રવાક) વિહંગો, હાથી, જુવાનજોધ ને ધનુષ્યધારી વ્યાધયુવક—એ બધું ક્રમશઃ તૂલિકા વડે ચિત્રપટમાં આલેખ્યું. (૪૫૯–૪૬૦). વળી પદ્મ-સરોવર, અનેક પ્રકારના વૃક્ષોની ગીચ ઝાડીવાળી દારૂણ અટવી, અને ત્યાંનો હજારો કમળો વાળો ઋતુકાળ ચીતર્યાં. (૪૬૧). ચિત્રમાં રહેલા તે મારા કુંકુમવર્ણા, મનોરમ ચક્રવાકને હું અનન્ય ચિત્તે જોતી જ રહી. (૪૬૨).

## કૌમુદીમહોત્સવ

એ સમયે વિવિધ ગુણ અને નિયમવાળી, પવિત્ર શરદપૂર્ણિમા નજીકમાં જ હતી. (૪૬૩) ...ધર્મના જેવી શુભકર, અને અધર્મની પ્રતિબંધક એવી ઘોષણા કરવામાં આવી. લોકોએ આ વ્રતનિમિત્તે ઉપવાસ અને દાન આદર્યાં. (૪૬૪–૪૬૫). આમ, હે ગૃહ-સ્વામિની દ્વિજોની દુર્દશા દૂર કરવાવાળો અને ધર્મ કરાવાવાળો શરદપૂનમનો દિવસ ક્રમે કરીને આવી લાગ્યો. (૪૬૬). અમ્માએ તથા બાપુજીએ ચોમાસાના અતિચારનું શોધન કર્યું, તથા મેં પણ પિતાજીની ઇચ્છાનુસાર ઉપવાસ, પ્રતિક્રમણ અને પારણાં કર્યાં. (૪૬૭). પર્વદિવસે બપોરને સમયે હું અગાસી ઉપર જોવા માટે ગઈ અને સ્વર્ગીય વિમાનોની શોભા ધરી રહેલી નગરીને જોવા લાગી. (૪૬૮). દૂધ જેવાં ધવળ, કળાકારોએ કુશળતાથી ચીતરેલા સ્તંભોવાળાં, આકાશને અડતાં, વિમાન જેવાં ભવનો મારી દૃષ્ટિએ પડયાં. (૪૬૯).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri


वर-भवण-पडिहार-ट्ठिया य कणयमय-भरिय-भिंगारा ।
घोसंति दाण-वइणं वर-वरियं दाण-कय-सद्दं ॥४७०
कणगं-कण्णा-गो-लक्ख-दूस-भूमी-किमिच्छग-पयाणो ।
सयणासण-जाणाणि य असणाणि जणो तहिं देह ॥४७१
ताओ अम्माए समं चेइय-सक्कारगं करेइ पुणो ।
विविह-गुण-जोग-जुत्तेसु देइ साहूसु दाणाइं ॥४७२
नव-कोडी-परिसुद्धं उग्गम-दोसेहिं दसहिं वि विमुक्कं ।
उप्पायण-दोसेहिं च सोलसहिं वि विवज्जिययं ॥४७३
तं वत्थ-पाण-भोयण-सयणासण-लेण-भायणादीयं ।
देमो अहियं दाणं उवग्गह-करं सु-विहियाणं ॥४७४
जिणवर-घरेसु य पुणो नाणा-मणि-कणय-रयण-रुप्पाणं ।
कुणिमो पयाणं(?) परस्स लोयस्स महप्फलं घरिणि ॥४७५
दिण्णस्स नत्थि नासो दाणस्स सुभासुभस्स सव्वत्थ ।
होइ सुभे पुण पुण्णं होइ अपुण्णं च असुभम्मि ॥४७६
विविह-गुण-जोग-जुत्तेसु विउल-तव-संजमेण जुत्ते सु ।
दिण्णं फासुय-दाणं सद्धा-सक्कार-विणएहिं ॥४७७
तं सेयं विउल-फलं पसवइ तत्तो निरामयं च पुणो ।
सुकुलम्मि समुप्पत्तिं माणुस-भव-सोभणिं कुणइ ॥४७८
एएण कारणेणं देमो तव-नियम-दंसण-धराणं ।
पत्तम्मि हवइ उ पत्त-दाणं संसार-मोक्ख-करं ॥४७९
रायावगारि-तक्कर-वितह-वयण-कारि-पार-दारीसु ।
होइ पुण अणिट्ठ-फलं फासुय-दाणं पि जं किंचि ॥४८०
अणुकंपाए निमित्तं बहुयाणं तत्थुवत्थियाणं तो ।
माहण-किविण-वणीमग-सयाण दिण्णा[इ] दाणाइं ॥४८१
दुरणुचर-नियम-बहुलो विकिट्ठ-खवणोववास दाण-रुई ।
अइरेग-धम्म-सीलो कोमुइ-दिवसे जणो आसी ॥४८२

❀

एव य पेच्छामि अहं नाणावत्थंतरे पुरवरीए ।
संखित्त-रस्सि-जालो सूरो य समोत्थरइ अत्थं ॥४८३
पुव्व-दिसा-पिय-कामिणि-परिभोग-किलंत-पंडुर-च्छाओ ।
अवर-दिसा-विलयाए निवडइ वच्छ-त्थले सूरो ॥४८४
नइयल-हिंडण संतो निम्मल-तवणिज्ज-रज्जु-भूयाहिं ।
ओयरइ व भूमि-तलं सूरो निययाहिं रस्सीहिं ॥४८५
सूरम्मि य अत्थमिए तिमिर-कलंकिज्जमाण-सामाए ।
पडिवण्णो जिय-लोओ सव्वो वि य साम-भावेण ॥४८६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## દાનપ્રવૃત્તિ

સુંદર ભવનોનાં દ્વાર પર મૂકેલા જળ ભરેલા સુવર્ણકળશો જાણે કે દાનેશ્વરીઓની મોંમાગ્યું દાન આપવાની શ્રદ્ધાની ઘોષણા કરી રહ્યા હતા. (૪૭૦). લોકો યથેચ્છ સોનું, કન્યા, ગાય, ભક્ષ્ય, વસ્ત્ર, ભૂમિ, શયન, આસન અને ભોજનનું દાન દેતા હતા. (૪૭૧). બાપુજી અને અમ્માએ ચૈત્યવંદન કરીને વિવિધ સદ્ગુણ અને સત્પ્રવૃત્તિવાળા સાધુઓને દાન દીધું.(૪૭૨). નવ કોટિએ કરીને શુદ્ધ, દસ પ્રકારના ઉદ્ગમદોષોથી મુક્ત, સોળ પ્રકારના ઉત્પાદનદોષોથી રહિત, એવું વસ્ત્ર, પાન, ભોજન, શયન, આસન, રહેઠાણ, પાત્ર વગેરેનું પુણ્યકારક પુષ્કળ દાન અમે સુચરિતોને દીધું. (૪૭૩-૪૭૪). જિનમંદિરોમાં પણ હે ગૃહસ્વામિની, અનેક પ્રકારના મણિ, રત્ન, સુવર્ણ અને રૂપાનું અમે દાન કર્યું, જેથી પરલોકમાં તેનું મોટું ફળ મળે. (૪૭૫).

